
कविकुलगुरु - कालिदास - संस्कृत - विश्वविद्यालयः

२।१४

॥श्री॥ इदं पुस्तकं श्रीमद्विद्वद्वंद्य वेदांतपरिभाषायाः ज्ञेयं॥

Acc. NO. ~~3156~~ M-1606

Title - वेदान्तपरिभाषा.

Author - ~~वेदान्त~~ धर्मराजाध्वरीन्द्र.

Date - ?

Sub - वेदान्त, तत्त्वज्ञान.

folio - 32.

Xerox - 64

॥साव॥
॥वें॰प॥१॥
॥श्रीसांबाय॥
॥नमः॥

॥श्रीगणेशाय नमः श्रीसरस्वत्यै नमः श्रीमद्गुरुभ्यो नमः॥ यद्विद्याविलासेन भूतभौतिकसृष्टयः॥ तं
नौमि परमात्मानं सच्चिदानंदविग्रहं॥ यदंतेवासिपंचास्यै। र्निरस्ता भेदवारणाः॥ तं नौमि नरसिंहाख्यं यतींद्रं
परमं गुरुं॥ श्रीमद्वेंकटनाथाख्यान्वेल्लंगुडिनिवासिनः॥ जगद्गुरूनहं वंदे सर्वतंत्रप्रवर्तकान्॥ [illegible] बोधा तेन
य मंदानां वेदांतार्थावलंबिनी॥ धर्मराजाध्वरींद्रेण परिभाषा वितन्यते॥ ॥इह खलु धर्मार्थकाममोक्षाख्येषु
चतुर्विधपुरुषार्थेषु मोक्ष एव परमः पुरुषार्थः॥ न स पुनरावर्तत इति श्रुत्या तस्य नित्यत्वावधारणात्॥ इतरेषां त्र
याणां प्रत्यक्षेण॥ तद्यथेह कर्मचितो लोकः क्षीयत एवमेवामुत्र पुण्यचितो लोकः क्षीयत इत्यादिश्रुत्या चानित्यत्वाव
गमात्॥ स च ब्रह्मज्ञानादिति ब्रह्म तज्ज्ञानं तत्प्रमाणं च सप्रपंचं निरूप्यते॥ तत्र प्रमायाः करणं प्रमाणं। तत्र

॥श्रीरस्तु॥

=स्मृतावतिव्याप्तिवारणाय बाधितार्थविषयकज्ञानत्वस्य =पक्षेत्वप्रयुक्तत्वादतिव्याप्तिवारणायानधि =गतेति। भ्रमेऽतिव्याप्तिवारणायाबाधितेति।।१।।

=भ्रमप्रमयोरतिव्याप्तिवारणायाबाधितेति।।

=घटः घट इत्याकारकधारावाहिकज्ञाने =प्रथमलक्षणस्याव्याप्तिमाशंक्याह नी =रूपस्येति।।१।।

स्मृतिव्यावृत्तं प्रमात्वमनधिगताबाधितार्थविषयज्ञानत्वं। स्मृतिसाधारणंत्वबाधितार्थविषयकज्ञानत्वं। नीरूपस्यापिका
लस्येंद्रियवेद्यत्वाभ्युपगमेन धारावाहिकबुद्धेरपि पूर्वपूर्वज्ञानाविषयतत्तत्क्षणविशेषविषयत्वेन न तत्राव्याप्तिः।। किंच
सिद्धांते धारावाहिकबुद्धिस्थलेन ज्ञानभेदः। किंतु यावद् घटस्फुरणं तावद् घटाकारांतःकरणवृत्तिरेकैव। न तु नाना। वृत्तेः
स्वविरो[illegible]त्पत्तिपर्यंतस्थायित्वाभ्युपगमात्।। तथा च तत्प्रतिफलितचैतन्यं घटादिज्ञानमपि तत्र तावत्कालीनमेकमेवे
ति नाव्याप्तिशंकापि। ननु सिद्धांते घटादेर्मिथ्यात्वेन बाधितत्वात्तज्ज्ञानं कथं प्रमा।। उच्यते। ब्रह्मसाक्षात्कारानंतरं हि घटादीनां
बाधः। यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येदिति श्रुतेः। न तु संसारदशायां बाधः। यत्र हि द्वैतमिव भवति तदितर इतरं प
श्यतीति श्रुतेः।। तथा चाबाधितपदेन संसारदशायामबाधितत्वं विवक्षितमिति न घटादिप्रमायामव्याप्तिः।। तदुक्तं देहा
त्मप्रत्ययो यद्वत्प्रमाणत्वेन कल्पितः।। लौकिकं तद्वदेवेदं प्रमाणं त्वात्मनिश्चयादिति। आ आत्मनिश्चयात् [illegible] ब्रह्मसा

×४ बाधितत्वं च स्वसमानाधिकरणासं[illegible]भावप्रतियोगित्वं।।२४

3

=२=साक्षादपरोक्षत्वं च स्वातिरिक्तप्रमाण=२
=२ जन्यज्ञानाविषयत्वं। स्वव्यवहाराभाव=२=



क्षात्कारपर्यंतमित्यर्थः। लौकिकमिति घटादिज्ञानमित्यर्थः॥ तानि च प्रमाणानि षट्। प्रत्यक्षानुमानोपमानागमार्थापत्यनुप
लब्धिभेदात्। तत्र प्रत्यक्षप्रमायाः करणं प्रत्यक्षप्रमाणं। प्रत्यक्षप्रमा चात्र चैतन्यमेव। यत्साक्षादपरोक्षाद्ब्रह्मेति श्रुतेः। अपरो
क्षादित्यस्यापरोक्षमित्यर्थः। ननु चैतन्यमनादि तत्कथं चक्षुरादेस्तत्करणत्वेन प्रमाणत्वमित्युच्यते। चैतन्यस्यानादित्वेऽपि
तदभिव्यंजकांतःकरणवृत्तिरिंद्रियसन्निकर्षादिना जायत इति वृत्तिविशिष्टं चैतन्यमादिमदित्युच्यते। ज्ञानावच्छे
दकत्वाच्च वृत्तौ ज्ञानत्वोपचारः। तदुक्तं विवरणे। अंतःकरणवृत्तौ ज्ञानत्वमुपचारादिति। ननु निरवयवस्यांतःकरण
मा। स्य परिणामात्मिका वृत्तिः कथं। इत्थं। न तावदंतःकरणं निरवयवं। सादिद्रव्यत्वेन सावयवत्वात्। सादिद्रव्यत्वं च तन्मनो
ऽसृजतेति श्रुतेः। वृत्तिरूपज्ञानस्य मनोधर्मत्वे च कामः संकल्पो विचिकित्सा श्रद्धाऽश्रद्धा धृतिरधृतिर्ह्रीर्धीर्भीरि
त्येतत्सर्वं मन एवेति श्रुतिर्मानं। धीशब्देन वृत्तिरूपज्ञानाभिधानात्। अतएव कामादेरपि मनोधर्मत्वं। ननु कामादेः

रंतःकरणधर्मत्वेहमिच्छाम्यहंजानाम्यहंबिभेमीत्याद्यनुभवआत्मधर्मेमवगाहमानः कथंउपपद्यते। उच्यते। अयःपिंड त्व
स्यदग्धृत्वाभावेपिदग्धृत्वाश्रयवह्नितादात्म्याध्यासाद्यथाऽयोदहतीतिव्यवहारस्तथासुखाद्याकारपरिणाम्यंतःकरणा
ध्यासादहंदुःखीअहंसुखीत्यादिव्यवहारः। नन्वंतःकरणस्येंद्रियतयाऽतींद्रियत्वात्कथंप्रत्यक्षविषयतेत्युच्यते। नतावदंतः
न करणमिंद्रियमित्यत्रमानमस्ति। मनःषष्ठानींद्रियाणीतिभगवद्गीतावचनंप्रमाणमितिचेन्न। अनिंद्रियेणापिमनसाष
ट्संख्यापूरणाविरोधात्। नहींद्रियगतसंख्यायाःपूरणमिंद्रियेणैवभवतीतिनियमः यजमानःपंचेतीत्यत्रऋत्विग्गत मार्त्विजइ
पंचत्वसंख्यायाअनृत्विजापियजमानेन। वेदानध्यापयामासमहाभारतपंचमानित्यत्र दौवेदगतपंचत्वसंख्यायाअवेदे डाभक्षयं४
नापिभारतेनपूरणदर्शनात्। इंद्रियेभ्यःपराह्यर्थाअर्थेभ्यश्चपरंमनइत्यादिश्रुत्यामनसोऽनिंद्रियत्वावगमाच्च। नचैवंमनसोऽ
निंद्रियत्वेसुखादिप्रत्यक्षस्यसाक्षात्वंनस्यादितिवाच्यं। नहींद्रियजन्यत्वेनज्ञानस्यसाक्षात्वं अनुमित्यादेरपिमनोजन्य

तयासाक्षात्त्वापत्तेः॥ ईश्वरज्ञानस्याजन्यस्य साक्षात्त्वानापत्तेश्च। सिद्धान्ते प्रत्यक्षत्वप्रयोजकं किमिति चेत्। किं ज्ञानगतस्य प्रत्यक्ष
त्वस्य प्रयोजकं पृच्छसि किं वा विषयगतस्य। आद्ये प्रमाणचैतन्यस्य विषयचैतन्याभेद इति ब्रूमः। तथा हि त्रिविधं चैतन्यं प्र
मातृचैतन्यं प्रमाणचैतन्यं विषयचैतन्यं चेति। तत्र घटाद्यवच्छिन्नचैतन्यं विषयचैतन्यं। अंतःकरणवृत्त्यवच्छिन्नचैतन्यं प्र
माणचैतन्यं। अंतःकरणावच्छिन्नचैतन्यं प्रमातृचैतन्यं। तत्र यथा तडागोदकं छिद्रान्निर्गत्य कुल्यात्मना केदारान्प्रविश्य
तद्वदेव चतुःकोणत्वाद्याकारं भवति। तथा तैजसमंतःकरणमपि चक्षुरादिद्वारा घटादिविषयदेशं गत्वा घटादिविषयाकारेण
परिणमते। स एव परिणामो वृत्तिरित्युच्यते। अनुमित्यादिस्थले तु नांतःकरणस्य वन्ह्यादिदेशगमनं वन्ह्यादेश्चक्षुराद्य
सन्निकर्षात्। तथा च अयं घट इत्यादिप्रत्यक्षस्थले घटादेस्तदाकारवृत्तेश्चैकत्र देशे समवधानात्तदुभयावच्छिन्नचैतन्यमे
कमेव विभाजकयोरपि अंतःकरणवृत्तिघटादिविषययोरेकदेशस्थत्वेन भेदाजनकत्वात्। अत एव मठादिवृत्ति घटा

वच्छिन्नाकाशो न मठाकाशाद्भिद्यते। तथा चायं घट इति प्रत्यक्षस्थले घटाकारवृत्तेर्घटसंयोगितया घटावच्छिन्नचैतन्यात्तद्वृत्तिचैतन्य
स्याभिन्नतया तत्र घटज्ञानस्य घटांशे प्रत्यक्षत्वं। सुख दुःखाद्यवच्छिन्नचैतन्यस्य तद्वृत्त्यवच्छिन्नचैतन्यस्य च नियमेनैकदेशस्थि
तोपाधिद्वयावच्छिन्नत्वात्। नियमेनाहं सुखीत्यादिज्ञानस्य सुखाद्यंशे प्रत्यक्षत्वं। नन्वेवं स्ववृत्तिसुखादिस्मरणस्यापि सुखाद्यं
शे प्रत्यक्षत्वापत्तिरिति चेन्न। तत्र स्मर्यमाणसुखस्यातीतत्वेन स्मृतिरूपान्तःकरणवृत्तेर्वर्तमानतया तत्रोपाध्योर्भिन्नका
लीनतया तत्तदवच्छिन्नचैतन्ययोर्भेदात्। उपाध्योरेकदेशस्थत्वस्यैककालीनत्वस्यैवोपधेयाभेदप्रयोजकत्वात्। यद्येकदे
शस्थत्वमात्रमुपधेयाभेदप्रयोजकं तदाहं पूर्वं सुखीत्यादिस्मृतावतिव्याप्तिवारणाय वर्तमानत्वं विषयविशेषणं देयं। न
न्वेवमपि स्वकीयधर्माधर्मौ वर्त्तमानौ यदा शब्दादिना ज्ञायेते तदा तादृशशाब्दज्ञानादावतिव्याप्तिः। तत्र धर्माद्यवच्छिन्नतद्वृ
त्त्यवच्छिन्नचैतन्ययोरेकत्वादिति चेन्न। योग्यत्वस्यापि विषयविशेषणत्वात्। अंतःकरणधर्मत्वाविशेषेपि किंचिद्योग्यं

किञ्चिदयोग्यमित्यत्र फलबलकल्प्यः स्वभाव एव शरणं। अन्यथान्यायमतेऽपि आत्मधर्मत्वात्सुखादेर्वह्न्यादेः प्रत्यक्षत्वापत्ति
[illegible]र्दुर्वारा। न चैवमपि वर्तमानतादशायां त्वं सुखीत्यादिवाक्यजन्यज्ञानस्य प्रत्यक्षतास्यादिति वाच्यं। इष्टत्वात् दशमस्त्व
मसीत्यादौ सन्निकृष्टविषये शब्दादप्यपरोक्षज्ञानाभ्युपगमात्। अत एव पर्वतो वह्निमानित्यादिज्ञानमपि वह्न्यंशे परोक्षं प
र्वतांशेऽपरोक्षं पर्वताद्यवच्छिन्नचैतन्यस्य बहिर्निःसृतान्तःकरणवृत्त्यावच्छिन्नचैतन्याभेदात्। वह्न्यंशे तु अन्तःकरणवृत्तेर्नि
र्गमनाभावेन वह्न्यवच्छिन्नचैतन्यस्य प्रमाणचैतन्यस्य च परस्पराभेदात्। तथा चानुभवः। पर्वतं पश्यामि वह्निमनुमिनोमीति।
८ न्यायमते तु पर्वतमनुमिनोमीत्यनुव्यवसायापत्तिः। असन्निकृष्टपक्षकानुमितौ तु पर्वतांशेऽपि ज्ञानं परोक्षं। सुरभि चन्दनमित्यादिज्ञानम
पि चन्दनखण्डांशेऽपरोक्षं सौरभ्यांशे तु परोक्षं। सौरभ्यस्य चक्षुरिन्द्रियायोग्यतया योग्यत्वघटितस्य निरुक्तलक्षणस्याभावात्। न चै
वमेकत्र ज्ञाने परोक्षत्वापरोक्षत्वयोरभ्युपगमे तयोर्जातित्वं न स्यादिति वाच्यं। इष्टत्वात्। जातित्वोपाधिपरिभाषायाः सकलप्रमा

ण्यगोचरतया सामान्यिकत्वात्। घटोऽयमित्यादिप्रत्यक्षं हि घटत्वादिसद्भावे मानं। न तु तस्य जातित्वेऽपि जातित्वरूपसाध्याप्रसिद्धौ न तत्साध

वा कानुमानस्याप्यनवकाशात्। समेयासिध्याब्रह्मभिन्नाखिलप्रपंचस्यानित्यतया च नित्यत्वसमवेतत्वघटितजातित्वस्य घटत्वा

दावसिद्धेश्च। एवमेवोपाधित्वं निरसनीयं। पर्वतोव ह्निमानित्यादौ पर्वतांशे वह्न्यंशे चान्तःकरणवृत्तिभेदांगीकारेण तत्तदवच्छे

दकभेदेन परोक्षत्वापरोक्षत्वयोरेकत्र चैतन्ये वृत्तौ न विरोधः। तथा च तत्तदिंद्रिययोग्यवर्तमानविषयावच्छिन्नचैतन्याभिन्नत्वं त

त्तदाकारवृत्त्यवच्छिन्नज्ञानस्य तत्तदंशे प्रत्यक्षत्वं॥ घटादेर्विषयस्य प्रत्यक्षत्वं तु प्रमात्रभिन्नत्वं। ननु कथं घटादेरंतःकरणावच्छिन्न

चैतन्याभेदः अहमिमं पश्यामीत्यनुभवविरोधादिति चेत् उच्यते। प्रमात्रभेदो नाम न तावदैक्यं किंतु प्रमातृसत्तातिरिक्तसत्ताकत्वा

भावः। तथा च घटादेः स्वावच्छिन्नचैतन्याध्यस्ततया विषयचैतन्यसत्तैव घटादिसत्ता। अधिष्ठानसत्तातिरिक्ताया आरोपितसत्ता

या अ[illegible]नंगीकारात्। विषयचैतन्यं च पूर्वोक्तप्रकारेण प्रमातृचैतन्यमेवेति प्रमातृचैतन्यस्यैव घटाद्यधिष्ठानतया प्र

घटादिविषयावच्छिन्नचैतन्यसत्तैव सत्ता

9

वे०प०॥

मातृसत्तैव घटादिसत्ता नान्येति सिद्धं घटादेरपरोक्षत्वं। अनुमित्यादिस्थले तु अंतःकरणस्य वन्ह्यादिदेशनिर्गमनाभावेन वन्ह्यवच्छिन्न
चैतन्यस्य प्रमातृचैतन्यानात्मकतया वन्ह्यादिसत्ता प्रमातृसत्तातो भिन्नेति नातिव्याप्तिः। नन्वेवमपि धर्माधर्मादिगोचरानुमित्यादि
स्थले धर्माधर्मयोः प्रत्यक्षत्वापत्तिः। धर्माद्यवच्छिन्नचैतन्यस्य प्रमातृचैतन्याभिन्नतया धर्मादिसत्तायाः प्रमातृसत्तानतिरेका
दिति चेन्न। योग्यत्वस्यापि विशेषणत्वात्। नन्वेवमपि रूपी घट इति प्रत्यक्षस्थले घटगतपरिमाणादेः प्रत्यक्षत्वापत्तिः। रू
पाद्यवच्छिन्नचैतन्यस्य परिमाणावच्छिन्नचैतन्यस्य चैकतया रूपाद्यवच्छिन्नचैतन्यस्य प्रमातृचैतन्याभेदे परिमाणावच्छिन्नचै
तन्यस्यापि प्रमात्रभिन्नतया परिमाणसत्तायाः प्रमातृसत्तातिरिक्तत्वाभावादिति चेन्न। तत्तदाकारवृत्त्युपहितत्वस्यापि प्र त्व
मातृविशेषणत्वात्। रूपाकारवृत्तिदशायां परिमाणाकारवृत्त्यभावेन तदुपहितप्रमातृचैतन्याभिन्नसत्ताकत्वाभावेना
तिव्याप्त्यभावात्। नन्वेवं वृत्तावव्याप्तिः। अनवस्थाभिया वृत्तिगोचरवृत्त्यनंगीकारात्। तत्र स्वाकारवृत्त्युपहितत्व घ

दितोक्तलक्षणाभावादिति चेन्न। अनवस्थाभियाऽन्त्ये वृत्त्यंतराविषयत्वेपि स्वविषयत्वाभ्युपगमेन स्वविषयवृत्त्युपहितप्रमातृचैत
न्याभिन्नसत्ताकत्वस्य तत्रापि [illegible] भावात्। एवं चांतःकरणतद्धर्मादीनां केवलसाक्षिविषयत्वेपि तत्तदाकारवृत्त्यभ्युपगमे
नोक्तलक्षणस्य तत्रापि सत्त्वान्नाव्याप्तिः। न चांतःकरणतद्धर्मादीनां वृत्तिविषयत्वाभ्युपगमे केवलसाक्षिविषयत्वाभ्युपगमवि
रोध इति वाच्यं। नहि वृत्तिं विना साक्षिविषयत्वं केवलसाक्षिवेद्यत्वं किंत्विंद्रियानुमानादिप्रमाणव्यापारमंतरेण साक्षिविषयत्वं।
अत एवाहंकारटीकायामाचार्यैरहमाकारांतःकरणवृत्तिरंगीकृता। अत एव प्रातिभासिकरजतस्थले रजताकाराऽविद्यावृत्तिः स्वा
प्रसाक्षिकेरंगीकृता। तथा चांतःकरणतद्धर्मादिषु केवलसाक्षिवेद्येषु वृत्त्युपहिततत्त्वघटितलक्षणस्य सत्त्वान्नाव्याप्तिः। तदयं निष्कृष्टो
र्थः स्वाकारवृत्त्युपहितप्रमातृचैतन्यसत्तातिरिक्तसत्ताकत्वशून्यत्वे सति योग्यत्वं विषयस्य प्रत्यक्षत्वं। तच्च संयोगसंयुक्ततो
दात्म्यादीनां सन्निकर्षाणां चैतन्याभिव्यंजकवृत्तिजनने विनियोगः। सा च वृत्तिश्चतुर्धा। संशयो निश्चयो गर्वः स्मरणमिति।

= अंतःकरणावच्छिन्नचैतन्यस्य योग्यवर्तमा-
= विषयचैतन्याभिन्नत्वं = ४ =

एवं सति वृत्तिभेदेन एकमप्यंतःकरणं मन इति बुद्धिरिति अहंकार इति चित्तमिति चाख्यायते। तदुक्तं मनो बुद्धिरहंकारश्चित्तं करण-
मांतरं॥ संशयो निश्चयो गर्वः स्मरणं विषया इमे॥ तच्च प्रत्यक्षं द्विविधं। सविकल्पकनिर्विकल्पकभेदात्। तत्र सविकल्पकं वैशिष्ट्याव-
गाहि। यथा घटमहं जानामीत्यादिज्ञानं। निर्विकल्पकं तु संसर्गानवगाहि ज्ञानं। यथा सोयं देवदत्तः तत्त्वमसीत्यादिवाक्यजन्यज्ञानं। ननु शाब्द-
मिदं न प्रत्यक्षं इंद्रियाजन्यत्वादिति चेन्न। न हींद्रियजन्यत्वं प्रत्यक्षत्वे तंत्रं दूषितत्वात्। किंतु योग्यवर्तमानविषयत्वे सति विषयचैतन्याभि-
न्नत्वमित्युक्तं। तथा च सोयं देवदत्त इति वाक्यजन्यज्ञानस्य सन्निकृष्टविषयतया बहिर्निःसृतांतःकरणवृत्त्यभ्युपगमेन देवदत्ता-
वच्छिन्नचैतन्यस्य तद्वृत्त्यवच्छिन्नचैतन्यस्य चाभेदेन सोयं देवदत्त इति वाक्यजन्यज्ञानस्य प्रत्यक्षत्वं। एवं तत्त्वमसीत्यादिवाक्यज-
न्यज्ञानस्य। तत्र प्रमातुरेव विषयतया तदुभयाभेदस्य सत्त्वात्। ननु वाक्यजन्यज्ञानस्य पदार्थसंसर्गावगाहितया कथं निर्विक-
ल्पकत्वं। उच्यते। वाक्यजन्यज्ञानविषयत्वे हि न पदार्थसंसर्गत्वं तंत्रं। अनभिमतसंसर्गस्यापि वाक्यजन्यज्ञानविषयतापत्तेः॥ किंतु ता

पि

त्पर्यं विषयसंसर्गत्वं। प्रकृते च सदेव सोम्येदमग्र आसीदित्युपक्रम्य तत्सत्यं स आत्मा तत्त्वमसि श्वेतकेतो इत्युपसंहारेण विशुद्धे ब्रह्मणि
वेदान्तानां तात्पर्यमवसितमिति कथं तात्पर्यविषयसंसर्गमेवबोधयेत्। इदमेव तत्त्वमस्यादिवाक्यानामखंडार्थत्वं। संसर्गानवगाहिय
थार्थज्ञानजनकत्वमिति। तदुक्तं संसर्गासंगिसम्यक्धीहेतुतया गिरामियं। उक्ताऽखंडार्थता यद्वा तत्प्रातिपदिकार्थता। तत्प्रातिप
दिकार्थमात्रपरत्वं वाऽखंडार्थत्वं इति चतुर्थः पादः॥ तच्च प्रत्यक्षं पुनर्द्विविधं। जीवसाक्षि ईश्वरसाक्षि चेति। तत्र जीवो नामांतःकर
णावच्छिन्नं चैतन्यं। तत्साक्षी तु अंतःकरणोपहितं चैतन्यं। अंतःकरणस्य विशेषणोपाधित्वाभ्यामनयोर्भेदः॥ विशेषणं च कार्यान्वयि व्या, व्या
वर्तकं। उपाधिश्च कार्यानन्वयी व्यावर्तको वर्तमानश्च। रूपविशिष्टो घट अनित्य इत्यत्र रूपं विशेषणं। कर्णशष्कुल्यवच्छिन्नं नभः श्रो
त्रमित्यत्र कर्णशष्कुली उपाधिः। अयमेवोपाधिर्नैयायिकैः परिचायक इत्युच्यते। प्रकृते चांतःकरणस्य जडतया विषयभा
सकत्वायोगेन विषयभासकचैतन्योपाधित्वं अयं च जीवसाक्षी प्रत्यात्मं नाना। एकत्वे चैत्रावगते मैत्रस्याप्यनुसंधानप्रसंग

श्री
॥७॥

ईश्वरसाक्षी तु मायोपहितं चैतन्यं। तच्चैकं तदुपाधिभूतमायाया एकत्वात्। इन्द्रो मायाभिः पुरुरूप ईयत इत्यादिश्रुतौ मायाभिरिति ब
हुवचनस्य मायागतशक्तिविशेषाभिप्रायत्वात् मायागतसत्वरजस्तमोगुणाभिप्रायतया वा उपपत्तेः। मायां तु प्रकृतिं विद्यान्मायिनं तु
महेश्वरं॥ नरत्यविद्याविततां हृदिय स्मिन्निवेशिते। योगी मायाममेयाय तस्मै विद्यात्मने नमः। अजामेकां लोहितशुक्लकृष्णां ब
ह्वीं प्रजां जनयन्तीं सरूपां॥ अजो ह्येको जुषमाण इत्यादिश्रुतिषु एकवचनबलेन लाघवानुगृहीतेन मायाया एकत्वं निश्चीयते। न
तेश्च तदुपहितं चैतन्यं ईश्वरसाक्षि। तच्चानादि। तदुपाधिमायाया अनादित्वात्। मायावच्छिन्नं चैतन्यं परमेश्वरः। मायाया विशेषत्वे ए
ईश्वरत्वं उपाधित्वे साक्षित्वमिति ईश्वरत्वसाक्षित्वयोर्भेदः न तु धर्मिणोरीश्वरतत्साक्षिणोः। स च प[illegible]रमेश्वर एकोपि स्वोपाधि
भूतमायानिष्ठसत्वरजस्तमोगुणभेदेन ब्रह्मविष्णुमहेश्वरशब्दवाच्यतां भजते। नन्वीश्वरसाक्षिणो नादित्वे तदैक्षत बहु स्यां प्रजा
येयेत्यादिसृष्टिपूर्वसमये परमेश्वरस्यागन्तुकमीक्षणमुच्यमानं कथमुपपद्यते। उच्यते। यथा विषयेन्द्रियसन्निकर्षादिकारणव

शेनजीवोपाध्यंतःकरणवृत्तिभेदाजायंते तथासृज्यमानप्राणिकर्मवशेनपरमेश्वरोपाधिभूतमायायांवृत्तिविशेषाइदमिदानींस्र
ष्टव्यमिदमिदानींपालयितव्यमिदमिदानींसंहर्तव्यमित्याद्याकाराजायंतेतासांचवृत्तीनांसादित्वात्तत्प्रतिबिंबितंचैतन्यमपिसादीत्यु
च्यते।एवंसाक्षिद्वैविध्येनप्रत्यक्षज्ञानद्वैविध्यंप्रत्यक्षत्वंचज्ञेयगतंज्ञप्तिगतंचनिरूपितं।तत्रज्ञप्तिगतप्रत्यक्षस्यसामान्यलक्षणं
चित्त्वमेव।पर्वतोवह्निमानित्यादावपिवह्न्याद्याकारवृत्त्युपहितचैतन्यस्यस्वात्मांशेप्रकाशतयाप्रत्यक्षत्वात्।नत्तद्विषयांशप्रत्यक्षत्वं
तुपूर्वोक्तमेव।तस्यभ्रांतिरूपप्रत्यक्षेनातिव्याप्तिः।भ्रमप्रमासाधारणप्रत्यक्षत्वसामान्यनिर्वचनेनतस्यापिलक्ष्यत्वात्।यदातुप्रत्यक्ष
प्रमायाएवंलक्षणंवक्तव्यंतदापूर्वोक्तलक्षणेऽबाधितत्वंविषयविशेषणंदेयं।शुक्तिरूप्यादिभ्रमस्यसंसारकालीनबाधविषयप्रातिभासि
करजतादिविषयकत्वात्।।ननुविसंवादिप्रवृत्त्याभ्रांतिज्ञानविषयसिद्धावपितस्यप्रातिभासिकतत्कालोत्पन्नरजतादिविषयकत्वे
नप्रमाणंदेशांतरीयरजतस्यक्लृप्तस्यैवतद्विषयत्वसंभवादितिचेन्न।तस्यासन्निकृष्टतयाप्रत्यक्षविषयत्वायोगात्।नचज्ञानंतत्र

प्रत्यासत्तिः। ज्ञानस्य प्रत्यासत्तित्वे तत एव वन्ह्यादेः प्रत्यक्षत्वापत्तौ अनुमानाद्युच्छेदापत्तेः। ननु रजतोत्पादकानां रजतावयवादीनाम
भावे शुक्तौ कथं तत्रापि रजतमुत्पद्यत इति चेत्। उच्यते। न हि लोकप्रसिद्धसामग्री प्रातिभासिकरजतोत्पादिका किंतु विलक्षणैव। तथा हि
काचादिदुषितलोचनस्य पुरोवर्तिद्रव्यसंयोगादिदमाकारा चाकचिक्याकारा च काचिदंतःकरणवृत्तिरुदेति। तस्यां च वृत्ता विदम
वच्छिन्नचैतन्यं प्रतिबिंबते तत्र पूर्वोक्तरीत्या वृत्तेर्निर्गमनेनेदमवच्छिन्नचैतन्यं वृत्त्यवच्छिन्नचैतन्यं प्रमातृचैतन्यं चाभिन्नं भ
वति। ततश्च प्रमातृचैतन्याभिन्नविषयचैतन्यनिष्ठा शुक्तित्वप्रकारिकाऽविद्या चाकचिक्यादिसादृश्यदर्शनसमुद्बोधितरज
तसंस्कारसध्रीचीना काचादिदोषसमवहिता रजतरूपार्थाकारेण रजतज्ञानाभासाकारेण च परिणमते। परिणामो नाम
उपादानसमसत्ताककार्यापत्तिः। विवर्तो नाम उपादानविषमसत्ताककार्यापत्तिः। प्रातिभासिकरजतं च अविद्यापेक्षया
परिणामः चैतन्यापेक्षया विवर्त इत्युच्यते। अविद्यापरिणामरूपं च तद्रजतमविद्याधिष्ठाने इदमवच्छिन्नचैतन्ये वर्तते।

अस्मन्मते सर्वस्यापि कार्यस्य स्वोपादानाविद्याधिष्ठानाश्रितत्वनियमात्। ननु चैतन्यनिष्ठरजतस्य कथमिदं रजतमिति पुरोवर्तिता
दात्म्यं। उच्यते। यथा न्यायमते आत्मनिष्ठस्य सुखादेः शरीरनिष्ठत्वेनोपलंभः शरीरस्य सुखाधिकरणत्वावच्छेदकत्वात्। तथा चै
तन्यमात्रस्य रजतं प्रत्यनधिष्ठानतया इदमवच्छिन्नचैतन्यस्य तदधिष्ठानत्वेनेदमोवच्छेदकतया रजतस्य पुरोवर्तिसंसर्गप्र
त्ययउपपद्यते। तस्य च विषयचैतन्यस्य तदंतःकरणोपहितचैतन्याभिन्नतया विषयचैतन्ये ध्यस्तमपि रजतं साक्षिण्यध्य
स्तं केवलसाक्षिवेद्यं सुखादिवदनन्यवेद्यमुच्यते। ननु साक्षिण्यध्यस्तत्वे अहं रजतमिति तद्धानितिवा प्रत्ययः स्यादहं सुखीतिवदिति
चेत्। उच्यते। न हि सुखादीनामंतःकरणावच्छिन्नचैतन्यनिष्ठाविद्याकार्यत्वमयुक्तं अहं सुखीतिज्ञानं। सुखादीनां घटादिवत्
शुद्धचैतन्ये एवाध्यासात्। किंतु यस्य यदाकारानुभवसंस्कारसहकृताविद्याकार्यत्वं तस्य तदाकारानुभवविषयत्वमेवानुगतं
नियामकं। तथा चेदमाकारानुभवसंस्कारसहकृताविद्याकार्यत्वात् घटादेरिवेदमाकारानुभवविषयता। अहमाकारानुभ

वेदांतप०
॥९॥

वाहितसंस्कारसहकृताविद्याकार्यत्वादंतःकरणादेरहमनुभवविषयत्वं। शरीरेंद्रियादेरुभयविधानुभवसंस्कारसहिताविद्याकार्यत्वात्।
उभयविधानुभवविषयत्वं। तथा चोभयविधानुभवः। इदं शरीरमयं देहः अहं मनुष्यः अहं ब्राह्मणः इदं चक्षुरहं काणः इदं श्रोत्रमहं
बधिर इति। प्रकृते च प्रातिभासिकरजतस्य प्रमातृचैतन्याभिन्नेदमवच्छिन्नचैतन्यनिष्ठाविद्याकार्यत्वेपीदं रजतमिति सत्यस्थ
लीयेदमंशाकारानुभवाहितसंस्कारजन्यत्वादिदमाकारानुभवविषयता न त्वहं रजतमित्यहमाकारानुभवविषयतेत्यनुसं
धेयं। नन्वेवमपि मिथ्यारजतस्य साक्षात्साक्षिसंबंधितया भानसंभवे रजतगोचरज्ञानाभासरूपाया अविद्यावृत्तेरभ्युपग
मः किमर्थमिति चेदुच्यते। स्वगोचरवृत्त्युपहितचैतन्याभिन्नसत्ताकत्वाभावस्य विषयापारोक्ष्यरूपतया रजतस्यापारोक्ष्यत्वसि
द्धये तदभ्युपगमात्। नन्विदंवृत्ते रजताकारवृत्तेश्च प्रत्येकमेकैकविषयत्वे गुरुमतवत् विशिष्टज्ञानानभ्युपगमे कुतो भ्रमज्ञा
नसिद्धिरिति चेन्न। वृत्तिद्वयप्रतिबिंबितचैतन्यस्यैकस्य सत्यमिथ्यावस्तुतादात्म्यावगाहित्वेन भ्रमत्वस्वीकारात्। अत एव सा

क्षिज्ञानस्य सत्यासत्यविषयतया प्रामाण्यानियमात्प्रामाण्योक्तिः सांप्रदायिकानां। ननु सिद्धान्ते देशान्तरीयरजतमप्यविद्याकार्यम
ध्यस्तं चेति कथं शुक्तिरूप्यस्य वैलक्षण्यमिति चेत्। न। त्वन्मते सत्यत्वाविशेषेऽपि केषांचित्क्षणिकत्वं केषांचित्स्थायित्वमित्यत्र यदे
व नियामकं तदेव स्वभावविशेषादिकं ममापि। यद्वा घटाद्यध्यासे अविद्यैव दोषस्तेनापि हेतुः। शुक्तिरूप्याध्यासे तु काचादयो दोषाः। तथा
चागन्तुकदोषजन्यत्वं प्रातिभासिकत्वे प्रयोजकं। अत एव स्वप्नोपलब्धरथादीनामागन्तुकनिद्रादोषजन्यत्वात्प्रातिभासिकत्वं। ननु
स्वप्नस्थले पूर्वानुभूतरथादेः स्मरणमात्रेणैव व्यवहारोपपत्तौ न रथादिसृष्टिकल्पने गौरवादिति चेन्न। रथादेः स्मृतिमात्राभ्युपग
मे रथं पश्यामि स्वप्ने रथमद्राक्षमित्याद्यनुभवविरोधापत्तेः। अथ रथान् रथयोगान् पथः सृजत इति रथादिसृष्टिप्रतिपादिकश्रुति
विरोधापत्तेश्च। तस्माच्छुक्तिरूप्यवत्स्वप्नोपलब्धरथादयोऽपि प्रातिभासिकाः यावत्प्रतिभासमवतिष्ठन्ते। ननु स्वप्ने रथाद्यधिष्ठानत
योपलभ्यमानदेशविशेषस्यापि तदाऽसंनिकृष्टतयाऽनिर्वचनीयप्रातिभासिकदेशोऽभ्युपगन्तव्यः तथा चाध्यासः कुत्रेति चेन्न। श्रीः।

श्रीवे०प०
॥१७॥

चैतन्यस्य प्रस्वयंप्रकाशस्य रथाद्यधिष्ठानत्वात्। प्रतीयमानरथादिरस्तीत्येवं प्रतीयत इति सद्रूपेण प्रकाशमानं चैतन्यमेवाधिष्ठानं। देश
विशेषोपि च्छिद्यस्तः प्रातिभासिकः रथादाविंद्रियग्राह्यत्वमपि प्रातिभासिकं। तदा सर्वेंद्रियाणामुपरमात् अहं गज इति प्रतीत्यापादनं तु
पूर्ववन्निरसनीयं स्वप्न गजादयः साक्षान्मायापरिणामा इति केचित्। अंतःकरणद्वारा तत्परिणामा इत्यन्ये॥ ननु गजादेः शुद्धचैतन्या
ध्यस्तत्वे इदानीं तत्साक्षात्काराभावेन जागरणेपि स्वप्नोपलब्धगजादयोऽनुवर्तेरन्नित्युच्यते। कार्यविनाशो हि द्विविधः कश्चित्तु पादा
ननाशेन सह कश्चित्तु विद्यमान एवोपादाने। आद्यो। बाधः। द्वितीयस्तु निवृत्तिः। आद्यस्य कारणमधिष्ठानतत्वसाक्षात्कारः। तेन विनोपादानभू
तायाअविद्यायाअनिवृत्तेः। तदिह ब्रह्मसाक्षात्काराभावात्स्वप्नप्रपंचो मा बाधिष्ट। मुशलप्रहारेण घटादेरिव विरोधिप्रत्ययांतरोदये न स्व
जनकीभूतनिद्रादिदोषनाशेन वा गजादिनिवृत्तौ को विरोधः। एवं च शुक्तिरूप्यस्य शुक्त्यवच्छिन्नचैतन्यनिष्ठतूलाविद्याकार्यत्वपक्षे शुक्ति
रिति ज्ञानेन तदज्ञानेन सह रजतस्य बाधः। मूलाविद्याकार्यत्वपक्षे मूलाविद्याया ब्रह्मसाक्षात्कारनिवर्त्यतया शुक्तितत्वज्ञानेनानिवर्त्यत

यारजतस्य तत्र शुक्तिज्ञानाभिन्नं वृत्तिमात्रं मुसलप्रहारेण घटस्येव। ननु शुक्तौ रजतस्य प्रतिभाससमये सत्वाभ्युपगमे इदं कालत्रयेपि न र
जतमिति त्रैकालिकनिषेधज्ञानं न स्यात् किं त्विदानीमिदं न रजतमिदानीं न घटः श्याम इतिवदिति चेन्न। न हि तत्र रजतत्वावच्छिन्नप्रति
योगिताकाभावो निषेधधीविषयः किंतु लौकिकपारमार्थिकत्वावच्छिन्नप्रातिभासिकरजतप्रतियोगिकः व्यधिकरणधर्मावच्छिन्नप्रति
योगिताकाभावाभ्युपगमात्। ननु प्रातिभासिके रजते पारमार्थिकत्वमवगतं न वा। अनवगते प्रतियोगितावच्छेदकावच्छिन्नाज्ञानादभा
वप्रत्यक्षानुपपत्तिः। अवगते परोक्षावभासस्य तत्कालीनविषयसत्तानियतत्वात् रजते पारमार्थिकत्वमप्यनिर्वचनीयं रजतवदेवो
त्पन्नमिति तदवच्छिन्नरजतसत्वे तदवच्छिन्नाभावस्तत्र कथं वर्तते इति चेन्न। पारमार्थिकत्वस्याधिष्ठाननिष्ठस्य रजते प्रतिभाससंभ
वेन रजतनिष्ठपारमार्थिकत्वोत्पत्तेरनभ्युपगमात्। यत्रारोप्यमसन्निकृष्टं तत्रैव प्रातिभासिकवस्तूत्पत्तेरंगीकारात्। अत एवं चेन्द्रिय
सन्निकृष्टजपाकुसुमलौहित्यस्य स्फटिके भानसंभवान्न स्फटिके निर्वचनीयलौहित्योत्पत्तिः। नन्वेवं यत्र जपाकुसुमं द्रव्यान्तरव्यवधा

वे०प०
॥१४॥

दसन्निकृष्टंतत्रलौहित्यप्रतीत्याप्रातिभासिकंलौहित्यंस्वीक्रियतइतिचेन्न। इष्टत्वात्। एवंप्रत्यक्षप्रमांतरेष्वपिप्रत्यक्षस्यसामान्यलक्षणानुगमाययथार्थप्रत्यक्षलक्षणासंभवश्चदर्शनीयः॥ उक्तंप्रत्यक्षंप्रकारांतरेणद्विविधं। इंद्रियजन्यमिंद्रियाजन्यंचेति। तत्रेंद्रियाजन्यंसुखादिप्रत्यक्षंमनसइंद्रियत्वस्यनिराकरणात्। इंद्रियाणिपंच। घ्राणरसनचक्षुःश्रोत्रत्वगात्मकानि। सर्वाणींद्रियाणिस्वस्वविषयसंयुक्तान्येवप्रत्यक्षज्ञानंजनयंति। तत्रघ्राणरसनत्वगिंद्रियाणिस्वस्थानस्थितान्येवगंधरसस्पर्शोपलंभात्मकंजनयंति। चक्षुःश्रोत्रेतुस्वतएवविषयदेशंगत्वास्वस्वविषयंगृह्णीतः। श्रोत्रस्यचक्षुरादिवत्परिच्छिन्नतयाभेर्यादिदेशगमनसंभवात्। अतएवानुभवोभेरीशब्दोमयाश्रुतइति। वीचितरंगन्यायेनकर्णशष्कुलीप्रदेशेअनंतशब्दोत्पत्तिकल्पनायांगौरवंभेरीशब्दोमयाश्रुतइतिप्रत्ययस्यभ्रमत्वकल्पनागौरवंचस्यात्। तदेवंव्याख्यातंप्रत्यक्षं॥ अथानुमानंनिरूप्यते॥ अनुमितिकरणमनुमानं॥ अनुमितिर्व्याप्तिज्ञानत्वेनव्याप्तिज्ञानजन्या। व्याप्तिज्ञानानुव्यवसायादेस्तत्त्वेनतज्जन्यत्वाभावान्नानुमितित्वं। अनुमितिकरणंचव्याप्तिज्ञानं। तत्संस्कारोऽ

वांतरव्यापारः नतु तृतीयलिंगपरामर्शोनुमितौ करणं। तस्यानुमितिहेतुत्वासिध्या तत्करणत्वस्य दूरनिरस्तत्वात्। न च संस्कारजन्यत्वेना
नुमितेः स्मृतित्वापत्तिः स्मृतिप्रागभावजन्यत्वस्य संस्कारमात्रजन्यत्वस्य वा स्मृतित्वप्रयोजकतया संस्कारध्वंससाधारणसंस्कारज
न्यत्वस्य तदप्रयोजकत्वात्। न च यत्र व्याप्तिस्मरणादनुमितिस्तत्र कथं संस्कारो हेतुरिति वाच्यं। व्याप्तिस्मृतिस्थलेपि तत्संस्कारस्यैवा
नुमितिहेतुत्वात्। नहि स्मृतेः संस्कारनाशकत्वनियमः स्मृतिधारादर्शनात्। न चानुद्बुद्धसंस्कारादप्यनुमित्यापत्तिः। उद्बोधकस्या
पि सहकारित्वात्। एवं चायं धूमवानिति पक्षधर्मताज्ञानेन धूमो वह्निव्याप्य इत्यनुभवाहितसंस्कारोद्बोधे च सति वह्निमानित्यनु
मितिर्भवतीति। ननु मध्ये व्याप्तिस्मरणं तज्जन्यं च वह्निव्याप्यधूमवानयमित्यादि विशिष्टज्ञानं वा हेतुत्वेन कल्पनीयं। गौरवान्माना
भावाच्च। तत्र व्याप्तिज्ञानं वह्निविषयकत्वांशे कारणं। ननु पर्वतविषय[illegible]त्वांशे इति पर्वतो वह्निमानिति ज्ञानस्य वह्न्यंशे एवानुमिति
घं त्वं न पर्वतांशे। तदंशे प्रत्यक्षत्वस्योपपादितत्वात्। व्याप्तिश्चाशेषसाधनाश्रयाश्रितसाध्यसामानाधिकरण्य[illegible]रूपा। सा च व्य

त्वमेवशरणंमम॥
वे॰प॰
॥१२॥

भूयोदर्शनं

भिचारादर्शनेसतिसहचारदर्शनेनगृह्यते। तच्चसहचारदर्शनंसकृद्दर्शनंवेतिविशेषोनादरणीयः। सहचारदर्शनस्यैवप्रयोजक
त्वात्। तच्चानुमानमन्वयिरूपमेकमेवनतुकेवलान्वयिसर्वस्यापिधर्मस्यास्मन्मतेब्रह्मनिष्ठात्यंताभावप्रतियोगित्वेनात्यंताभावाप्रति
योगिसाध्यकत्वरूपकेवलान्वयित्वस्यासिद्धेः। नाप्यनुमानस्याव्यतिरेकिरूपत्वं। साध्याभावेसाधनाभावनिरूपितव्याप्तिज्ञानस्यसा
धनेनसाध्यानुमितावनुपयोगात्। कथंतर्हिधूमा दावन्वयव्याप्तिमविदुषोपिव्यतिरेकव्याप्तिज्ञानादनुमितिः। अर्थापत्तिप्रमा
णादितिवक्ष्यामः। अतएवानुमानस्यनान्वयव्यतिरेकिरूपत्वं। ~~व्यतिरेकिरूपत्वं~~। व्यतिरेकव्याप्तिज्ञानस्यानुमित्यहेतुत्वात्। तच्चानुमा
नंस्वार्थपरार्थभेदेनद्विविधं। तत्रस्वार्थमुक्तमेव। परार्थंतुन्यायसाध्यं। न्यायोनामावयवसमुदायः। अवयवाश्चत्रयएव। प्रतिज्ञाहे
तूदाहरणरूपाः उदाहरणोपनयनिगमनरूपावा। नतुपंचावयवरूपावौ उदाहरणान्तेनैवव्याप्तिपक्षधर्मतयोरुपदर्शनसंभ
वेनाधिकावयवद्वयस्यव्यर्थत्वात्। एवमनुमानेनिरूपितेतस्माद्ब्रह्मभिन्ननिखिलमिथ्यात्वसिद्धिः। तथाहिब्रह्मभिन्नंसर्वं

मिथ्या ब्रह्मभिन्नत्वाद् घटादेवं तदेवं यथा शुक्तिरूप्यं। ननु दृष्टान्तासिद्धिः तस्य साधितत्वात्। न चाप्रयोजकत्वं। शुक्तिरूप्यरज्जुसर्पादीनां मिथ्यात्वे
ब्रह्मभिन्नत्वस्यैव लाघवेन प्रयोजकत्वात्। मिथ्यात्वं च स्वाश्रयत्वेनाभिमतयावन्निष्ठात्यन्ताभावप्रतियोगित्वं। अत्राभिमतपदमसंभववार
णाय। यावत्पदमर्थान्तरवारणाय॥ सर्वेषामपि भावानां स्वाश्रयत्वेन संमते। प्रतियोगित्वमत्यन्ताभावं प्रतिमृषात्मतेति। यद्वा। अयं पटः ए
तत्तन्तुनिष्ठात्यन्ताभावप्रतियोगी पटत्वात् पटान्तरवदित्याद्यनुमानं मिथ्यात्वे प्रमाणं। तदुक्तं। अंशिनः स्वांशगात्यन्ताभावस्य प्रतियोगि
ता। अंशित्वादितरांशीव दिगेवं गुणादिषु। न न च घटादेर्मिथ्यात्वे सन् घट इति प्रत्यक्षेण बाधः अधिष्ठानब्रह्मनिष्ठासत्तायास्तत्र वि
षयतया घटादेः सत्त्वासिद्धेः। न च। नीरूपस्य ब्रह्मणः कथं चाक्षुषादिज्ञानविषयतेति वाच्यं। नीरूपस्यापि रूपादेः प्रत्यक्षविषयत्वात्।
न च नीरूपस्य द्रव्यस्य चक्षुराद्ययोग्यत्वमिति नियमः। तन्मते ब्रह्मणो द्रव्यत्वासिद्धेः। गुणाश्रयत्वं समवायिकारणत्वं वा द्रव्यत्वमि
ति तेऽभिमतं। न हि निर्गुणस्य ब्रह्मणो गुणाश्रयता। नापि समवायिकारणता। समवायासिद्धेः अस्तु वा द्रव्यत्वं ब्रह्मणः तथापि नीरू

इति
तु
गवय

पस्यकालस्येव चाक्षुषादिज्ञानविषयत्वेन विरोधः। यद्वा त्रिविधं सत्वं पारमार्थिकसत्वं ब्रह्मणः व्यावहारिकसत्वमाकाशादेः प्रातिभासिकं स
त्वं शुक्तिरजतादेः। तथा च घटः सन्निति प्रत्यक्षस्य व्यावहारिकसत्वविषयत्वेन प्रामाण्यमस्मिन्पक्षे प्रामाण्यं च घटादेर्ब्रह्मणि निषेधो न स्वरू
पेण किं पारमार्थिकत्वेनैवेति न विरोधः। अस्मिन्पक्षे च मिथ्यात्वलक्षणे पारमार्थिकत्वावच्छिन्नप्रतियोगित्वमत्यंताभावविशेषणं द्रष्टव्यं।
तस्मादुपपन्नं मिथ्यात्वानुमानमिति। अथोपमानं निरूप्यते। सादृश्यप्रमाकरणमुपमानं। तथा हि। नागरेषु दृष्टगोपिंडस्य पुरुष
स्य वनं गतस्य गवयेंद्रियसन्निकर्षे सति भवति प्रतीतिरयं पिंडो गोसदृश इति तदनंतरं च भवति निश्चयोऽनेन सदृशी मदीया गौ
रिति। तत्रान्वयव्यतिरेकाभ्यां गवयनिष्ठगोसादृश्यज्ञानं करणं गोनिष्ठगवयसादृश्यज्ञानं फलं न चेदं प्रत्यक्षेण संभवति गोपिंडस्य
तदेंद्रियासन्निकर्षात् नाप्यनुमानं नैगैरेनिष्ठगोसादृश्यस्यातल्लिंगत्वात्। नापि मदीया गौरेतद्गवयसदृशी एतन्निष्ठसादृश्यप्र
तियोगित्वात् यो यद्गतसादृश्यप्रतियोगी स तत्सदृशः यथा मैत्रनिष्ठसादृश्यप्रतियोगी चैत्रः मैत्रसदृश इति अनुमानात्त

सम्भव इति वाच्यं। एवंविधानुमानानवतारेप्यनेन सदृशी मदीया गौरिति प्रतीतेरनुभवसिद्धत्वादुपमिनोमीत्यनुव्यवसायाच्च। तस्मादुप
मानं मानांतरं॥ अथागमो निरूप्यते। यस्य वाक्यस्य तात्पर्यविषयीभूतः संसर्गो मानांतरेण न बाध्यते तद्वाक्यं प्रमाणं। वाक्यजन्ये ज्ञाने
आकांक्षा योग्यता सत्तयस्तात्पर्यज्ञानं चेति चत्वारि कारणानि। पदार्थानां परस्परजिज्ञासाविषयत्वयोग्यत्वमाकांक्षा। क्रियाश्रवणे कारक
स्य कारकश्रवणे क्रियायाः करणश्रवणे इतिकर्तव्यतायाश्च जिज्ञासाविषयत्वाद् जिज्ञासोरपि वाक्यार्थबोधात् योग्यत्वमुपात्तं। तदव
च्छेदकं च क्रियात्वकारकत्वादिकमिति नातिव्याप्तिः। अभेदान्वये समानविभक्तिकपदस्मृतिप्रयुक्तं तदवच्छेदकमिति न त्वमस्यादिषु
वाक्येषु नाव्याप्तिः। एतादृशाभिप्रायेणैव बलाबलाधिकरणे मौ वैश्वदेव्यामिक्षा वाजिभ्यो वाजिनमित्यत्र वैश्वदेवयागस्यामिक्षाभि
तत्वेन न वाजिनाकांक्षेत्यादिव्यवहारः। ननु तत्रापि वाजिनस्य जिज्ञासाविषयत्वेपि तद्योग्यत्वमस्त्येव मदेयद्रव्यत्वस्य यागनिरूपि
तजिज्ञासाविषयतावच्छेदकत्वादिति चेत् न। स्वसमानजातीयपदार्थान्वयबोधविरहसहकृतमदेयद्रव्यत्वस्यैव तदवच्छेदक

॥श्रीरामायनमः
वे०प०१८॥

तेन वाजिनद्रव्यस्य स्वसमानजातीयामिक्षाद्रव्यान्वयबोधसहकृतत्वेन तादृशावच्छेदकत्वाभावात्। आमिक्षायां तु नैवं। वाजिनान्वयस्य
तदानुपस्थितेस्तस्यानात्। उदाहरणांतरेष्वपि दुर्बलत्वप्रयोजकआकांक्षाविरह एव मेवंबद्धव्यः। योग्यता च तात्पर्यविषयसंसर्गा
बाधः। — वह्निना सिंचतीत्यादौ तादृशसंसर्गबाधान्न योग्यता। समजापतिरात्मनो वपामुदखिदत् इत्यादावपि तात्पर्यविषयी
त॰ भूतपशुवपायाग-भाशस्त्या बाधो योग्यता। तत्त्वमस्यादिवाक्येष्वपि वाच्याभेदबाधेपि लक्ष्यस्वरूपाभेदबाधाभावात् योग्यता। आ
सत्तिश्च अव्यवधानेन पदजन्यपदार्थोपस्थितिः। मानांतरोपस्थापितपदार्थस्यान्वयबोधाभावात्। घटपदं निरूपकतासंबंधेन घट पदजन्येति
विषयकशक्तिविशिष्टं। घटरूपार्थज्ञानजनकत्वात्। यत्र यत्र पदार्थज्ञानजनकत्वं तत्र तत्र तद्विषयकशक्तिविशिष्टत्वं यथा पटादि
पदे। ~~पदजन्यपदार्थोपस्थितेस्सत्तिपदार्थत्वादेव नैपदार्थोपस्थितिमात्रस्य~~ अत एवाश्रुतस्थले तत्तत्पदाध्याहारोहारमित्या
दौ। अत एव पेत्यादौ छिनद्मीति पदाध्याहारः। अत एव च विकृतिषु सूर्यायजुष्टं निर्वपामीति पदप्रयोगः। पदार्थश्च द्विविधः।

28

भिन्नयोर्लक्ष्यश्चेति। तत्रशक्तिर्नाम पदार्थेषु मुख्या वृत्तिः यथा घटपदस्य पृथुबुध्नोदराकृतिविशिष्टवस्तुविशेषे वृत्तिः सा च वृत्तिः पदार्थांतरं।
सिद्धांते कारणादिषु कार्यानुकूलशक्तिमात्रस्य पदार्थांतरत्वात्। सा च तत्तत्पदजन्यपदार्थज्ञानरूपकार्यानुमेया। तादृशशक्तिविषय
त्वं शक्यत्वं तच्च जा तेरेव न व्यक्तेः व्यक्तीनामानंत्येन गुरुत्वात्। कथं तर्हि गवादिपदाच्छक्तिभानमिति चेत् जातेर्व्यक्तिसमानसंवि
तु त्संवेद्यत्वादिति क्रमः। यद्वा गवादिपदानां व्यक्तौ शक्तिः स्वरूपसती न ज्ञाता। जातौ तु सा ज्ञाता हेतुः न च व्यक्त्यंशे शक्तिज्ञानमपि का
रणं गौरवात् जातिशक्यत्वज्ञाने सति व्यक्तिशक्यत्वज्ञानेन विना व्यक्तिधीविलंबाभावाच्च अतएव न्यायमतेऽपि अन्वये शक्तिः
स्वरूपसतीति सिद्धांतः। ज्ञायमानशक्तिविषयत्वमेव वाच्यत्वमिति जातिरेव वाच्या। अथ वाच्येतरे लक्षणयावगमः यथा नी
लो घट इत्यत्र नीलशब्दस्य नीलगुणविशिष्टे लक्षणा। तथा जातिवाचकस्य तद्विशिष्टे लक्षणा। तदुक्तं। अनन्यलभ्यः शब्दार्थ इ
ति। एवं शक्यो निरूपितः अथ लक्ष्यः पदार्थो निरूप्यते। तत्र लक्षणाविषयो लक्ष्यः। लक्षणा च द्विविधा। केवललक्षणाल

ः स्वर्णेऽपि च पुल्लिंगः शंभुश्रीपतिवायुषु॥
पुष्करं करिहस्ताग्रे वाद्यभांडमुखे जले॥
वै० प० १२५॥

सिंहो माणवक इत्यत्र

क्षितलक्षणा चेति॥ तत्र शक्यसाक्षात्संबंधः केवललक्षणा। यथा गंगायां घोष इत्युक्ते प्रवाहसाक्षात्संबंधिनि तीरे गंगापदस्य केवललक्षणा।
यत्र शक्यपरंपरासंबंधेनार्थांतरप्रतीतिस्तत्र लक्षितलक्षणा। यथा द्विरेफपदे तत्र रेफद्वययुक्तभ्रमरपदघटितपरंपरासंबंधेन मधु
करे वृत्तिः। गौण्यपि लक्षितलक्षणैव। सिंहशब्दवाच्यसंबंधिक्रौर्यादिसंबंधेन माणवकस्य प्रतीतेः। प्रकारांतरेण लक्षणा त्रिविधा। जह
ल्लक्षणा अजहल्लक्षणा जहदजहल्लक्षणा चेति। यत्र शक्यार्थमनंतर्भाव्यैवार्थांतरप्रतीतिस्तत्र जहल्लक्षणा। यथा विषं भुंक्ष्वेत्यत्र हि स्वार्थं वि
हाय शत्रुगृहे भोजननिवृत्तिर्लक्ष्यते। यत्र शक्यार्थमंतर्भाव्यैवार्थांतरप्रतीतिस्तत्राजहल्लक्षणा। यथा शुक्लो घट इत्यत्र हि शुक्लशब्दः स्वार्थं शु
क्लगुणमंतर्भाव्यैव तद्वति द्रव्ये लक्षणया वर्तते। यत्र हि विशिष्टवाचकः शब्द एकदेशं विहाय एकदेशे वर्तते तत्र जहदजहल्लक्षणा। यथा सो
यं देवदत्त इत्यत्र हि पदद्वयवाच्ययोर्विशिष्टयोरैक्यानुपपत्त्या पदद्वयस्य विशेष्यमात्रे परत्वात्। यथा वा तत्त्वमसीत्यादौ तत्पदवाच्यसर्वज्ञ
त्वादिविशिष्टस्य त्वंपदवाच्येनांतःकरणविशिष्टेनैक्यायोगादैक्यसिध्यर्थं स्वरूपे लक्षणेति सांप्रदायिकाः। वयं तु ब्रूमः। ७ सोयं देवदत्त

गा

२ यथा घटोऽनित्य इत्यत्र घटपदवाच्यैकदेशघटत्वस्यायोग्यत्वेपि योग्यघटव्यक्त्या सहानित्यत्वान्वयः॥२

स्तत्त्वमसीत्यादौ विशिष्टवाचकानां पदानामेकदेशपरत्वेपि न लक्षणा। शक्त्युपस्थितविशिष्टयोरभेदान्वयानुपपत्तौ विशेष्ययोः शक्त्युपस्थितयो
रभेदान्वयाबोधाविरोधात्। यत्र पदार्थैकदेशस्य विशेषणतयोपस्थितिस्तत्रैव स्वातन्त्र्येणोपस्थितये लक्षणाभ्युपगमः। यथा घटोऽनित्य इत्य घट
त्र घटपदात् घटत्वस्य शक्त्या स्वातन्त्र्येणानुपस्थित्या तादृशोपस्थित्यर्थं घटपदस्य घटत्वे लक्षणा। एवं तत्त्वमसीत्यादिवाक्येपि न लक्षणा श
क्त्या स्वातन्त्र्येणोपस्थितयोस्तत्त्वपदयोरर्थयोरभेदान्वये बाधकाभावात् अन्यथा गेहे घटः पटे रूपं घटमानयेत्यादौ घटत्वगेहत्वादेरभि
ता ऽन्वयबोधायोग्यतया तत्रापि घटादिपदानां विशेष्यमात्रपरत्वे लक्षणा स्यात् तस्मात्तत्त्वमसीत्यादिवाक्ये आचार्याणां लक्षणोक्तिरभ्युप
गमवादेन बोध्या। अजहत्स्वार्थलक्षणोदाहरणं तु काकेभ्यो दधि रक्ष्यतामित्यादिकमेव तत्र शक्यैकदेशपरित्यागेनाशक्यदध्युपघातकत्वपुरस्का काक
रेण काकेतरकाकशक्तस्य च लक्षणाबीजं तु यथा तात्पर्यानुपपत्तिरेव न त्वन्वयानुपपत्तिः। काकेभ्यो दधि रक्ष्यतामित्यत्रान्वयानुपपत्त्यभा
वात्। गङ्गायां घोष इत्यादौ तात्पर्यानुपपत्तेरपि भावात्। लक्षणा न पदमात्रवृत्तिः किं तु वाक्यवृत्तिरपि यथा गम्भीरायां नद्यां घोष इत्यत्र ग

भीरायां नद्यामिति पदद्वय समुदायस्य तीरे लक्षणा। ननु वाक्यस्याशक्ततया कथं शक्यसंबंधरूपा लक्षणा। उच्यते। शक्त्यायत्पदेन
ज्ञाप्यते तत्संबंधो लक्षणा। शक्तिज्ञाप्यश्च यथा पदार्थः तथा वाक्यार्थोपीति न काचिदनुपपत्तिः। एवमर्थवादवाक्यानां प्रशंसारूपाणां प्रा
शस्त्ये लक्षणा। सोरोदीदित्यादिनिंदार्थवादवाक्यानां निंदितत्वे लक्षणा। अर्थवादगतपदानां प्राशस्त्ये लक्षणाभ्युपगमे एकेन पदेन लक्ष
यात्तदुपस्थितिसंभवे पदांतरवैयर्थ्यं स्यात्। एवं च विध्यपेक्षितप्राशस्त्यरूपपदार्थप्रत्यायकतयार्थवादपदसमुदायस्य पदस्थानीय
तया पदैस द्विधिना एकवाक्यं भवतीत्यर्थवादवाक्यानां पदैकवाक्यता। कृतद्वि वाक्यैकवाक्यता यत्र प्रत्येकं भिन्नभिन्नसंसर्गप्रतिपाद
कयोर्वाक्ययोराकांक्षावशेन महावाक्यार्थबोधकत्वं। यथा दर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेत्यादिवाक्यानां समिधो यजतीत्यादिवाक्या
नां च परस्परांगांगिभावबोधकवाक्यतयैवैकवाक्यता। तदुक्तं भट्टपादैः। स्वार्थबोधे समाप्तानामंगांगित्वव्यपेक्षया। वाक्यानामे
कवाक्यत्वं पुनः संहत्य जायते इति। एवं द्विविधोपि पदार्थो निरूपितः। तदुपस्थितिश्च आसत्तिः सा च शाब्दबोधे हेतुः। तथैवान्व

॥श्रीराम॥श्रीकृष्ण॥
श्रीशिवश्च॥

व्यतिरेकदर्शनात्। एवं महावाक्यार्थबोधेऽवान्तरवाक्यार्थबोधो हेतुः तथैवान्वयाद्यभावात्। वधारणात्। क्रमप्राप्तं तात्पर्यं निरूप्यते॥ तत्प्रती-
तीछयोच्चरितत्वं न तत्। अर्थज्ञानशून्येन पुरुषेणोच्चारिताद्वेदादर्थप्रत्ययाभावप्रसंगात्। अयमव्यापकोऽव्युत्पन्नइति विशेषदर्शनेन न तत्रता-
त्पर्यभ्रमस्याभावात्। न चेश्वरीयतात्पर्यज्ञानात्तत्र शाब्दबोध इति वाच्यम्। ईश्वरानंगीकर्तुरपि तद्वाक्यार्थप्रतिपत्तिदर्शनात्। उच्यते। तत्तत्प्रतीति-
जननयोग्यत्वं तात्पर्यं। गेहे घट इति वाक्यं गेहे घटसंसर्गप्रतीतिजननयोग्यं न तु पटसंसर्गप्रतीतिजननयोग्यमिति तद्वाक्यं घटसंसर्गपरं न
तु पटसंसर्गपरमित्युच्यते। ननु सैंधवमानयेत्यादिवाक्यं यदा लवणानयनप्रतीतीछया प्रयुक्तं तदा पश्वसंसर्गप्रतीतिजनने स्वरूपयो-
ग्यतासत्वात्। लवणपरत्वज्ञानदशायां अश्वादिसंसर्गज्ञानापत्तिरिति चेन्न। तदितरप्रतीतीछयाऽनुच्चरितत्वस्यापि तात्पर्यविशेषणत्वा-
त्। तथा च यद्वाक्यं यत्प्रतीतिजननयोग्यत्वे सति यदन्यप्रतीतीछयानोच्चरितं तद्वाक्यं तत्संसर्गपरमित्युच्यते। शुकादिवाक्येऽव्युत्पन्नोच्च-
रितवेदवाक्यादौ प्रतीतीछाया एवाभावेन तदन्यत्वेन प्रतीतीछयोच्चरितत्वाभावेन च लक्षणसत्वान्नाव्याप्तिः। न चोभयप्रतीतीछयोच्चरितेऽ-
व्याप्तिः। तदन्यमात्रप्रतीतीछयोच्चरितत्वस्य विवक्षितत्वात्। उक्तप्रतीतिमात्रयोग्यतायाश्चावच्छेदकत्वात्। अस्माकं मते सर्वत्र कारणं

त्प
प्य
द
च
जनन
ण

पानुच्चे

33

जन

तायां शक्तेरेवावच्छेदकत्वात् इति न कोपि दोषः। एवं तात्पर्यस्य तत्प्रतीतिजनकत्वरूपस्य शाब्दज्ञानं केवलं चतुर्थवर्णके तात्पर्यज्ञानं हेतुत्व
निराकरणवाक्यं तत्प्रतीतीच्छयोच्चरितत्वरूपतात्पर्यस्य निराकरणपरा। अन्यथा तात्पर्यनिश्चयफलवेदान्तविचारवैयर्थ्यप्रसं वे.
गात्। केचित्तु शाब्दज्ञानत्वावच्छेदेन तात्पर्यं न हेतुरित्येवंपरं चतुर्थवर्णकवाक्यं तात्पर्यसंशयविपर्ययोत्तरशाब्दज्ञानविशेषं च तात्प
र्यज्ञानं हेतुरेव। इदं वाक्यमेतत्परमेवोतान्यपरमिति संशये तद्विपर्यये च तदुत्तरवाक्यार्थविशेषनिश्चयस्य तात्पर्यनिश्चयं विनाऽनुप
पत्तेरित्याहुः। तच्च तात्पर्यं वेदे मीमांसापरिशोधितन्यायादेवावधार्यते। लोके तु प्रकरणादिना तत्र लौकिकवाक्यानां मानान्तरावग
तार्थकतयानुवादकत्वं। वेदे तु वाक्यार्थस्यापूर्वतयानानुवादकत्वं। तत्र लोके वेदे च कार्यपराणामिव सिद्धार्थानामपि प्रामाण्यं।
पुत्रस्ते जात इत्यादिषु सिद्धार्थेपि पदानां सामर्थ्यावधारणात्। अतएव वेदान्तवाक्यानां ब्रह्मणि प्रामाण्यं यथा चैतत्तथा विषयपरि
च्छेदे वक्ष्यते। ननु वेदानां नित्यसर्वज्ञपरमेश्वरप्रणीतत्वेन प्रामाण्यमिति नैयायिकाः। वेदानां नित्यत्वेन निरस्तसमस्तदूषण

तया प्रामाण्यमित्यश्वरमीमांसकाः। अस्माकं तु मते वेदो नित्यः उत्पत्तिमत्वात् उत्पत्तिमत्वं चास्य महतो भूतस्य निःश्वसितमेतद्यदृग्वेदो य-
जुर्वेद इत्यादिश्रुतेः। नापि वेदानां क्षणिकत्वं स्थायित्वं। य एव वेदो देवदत्तेनाधीतः स एव मया [illegible]त्यादिप्रत्यभिज्ञाविरोधात्। अत एव गका-
रादिवर्णानामपि न क्षणिकत्वं सोऽयं गकार इत्यादिप्रत्यभिज्ञाविरोधात्। तथा च वर्णपदवाक्यसमुदायरूपस्य वेदस्य वियदादिवत् सृ-
ष्टिकालीनोत्पत्तिकत्वं प्रलयकालीनध्वंसप्रतियोगित्वं च न तु मध्ये वर्णानामुत्पत्तिविनाशौ अनेन गकारादिकल्पनायां गौर-
वात्। अनुच्चारणदशायां वर्णानामनभिव्यक्तिस्तु उच्चारणरूपव्यञ्जकाभावात् न विरुध्यते। अंधकारस्थघटानुपलंभवत्। उत्पन्नो
गकार इत्यादिप्रत्ययस्तु सोऽयं गकार इत्यादिप्रत्यभिज्ञाविरोधादप्रमाणं। वर्णाभिव्यक्तिजनकध्वनिगतोत्पत्तिनिरूपितपरंपरासंबं-
धेन विषयकत्वेन प्रमाणं वा। तस्मान्न वेदानां क्षणिकत्वं। ननु क्षणिकत्वाभावेऽपि वियदादिप्रपंचवदुत्पत्तिमत्वेन परमेश्वरकर्तृकत-
या पौरुषेयतया अपौरुषेयत्वं वेदानामिति न च सिद्धान्तो भज्येतेति चेत्। न। पुरुषेणोच्चार्यमाणत्वं पौरुषेयत्वं गुरुमतेऽपि पौरुषे-

हि

यत्वापत्तेः। नापि पुरुषाधीनोत्पत्तिकत्वं नैयायिकाभिमतपौरुषेयत्वानुमानेऽस्मदादिनाऽसिद्धसाधनत्वापत्तेः किंतु सजातीयोच्चारणा
नपेक्षोच्चारणविषयत्वं। स तथा च सर्गाद्यकाले परमेश्वरः पूर्वसर्गसिद्धवेदानुपूर्वीसमानानुपूर्वीकं वेदं विरचितवान् नतु तद्विजा
तीयं वेदमिति न सजातीयोच्चारणानपेक्षोच्चारणविषयत्वं पौरुषेयत्वं। भारतादीनां तु सजातीयोच्चारणमनपेक्ष्यैवोच्चारण
मिति तेषां पौरुषेयत्वं। एवं पौरुषेयापौरुषेयभेदेनागमो द्विविधोऽपि निरूपितः। वेदान्तपरिभाषायामागमपरिच्छेदः। इदानीमर
थापत्तिर्निरूप्यते। तत्रोपपाद्यज्ञानेनोपपादककल्पनमर्थापत्तिः। तत्रोपपाद्यज्ञानं करणं उपपादकज्ञानं फलं। येन विना यदनुप
प न्नं तत्तत्रोपपाद्यं यस्याभावे यस्यानुपपत्तिस्तत्तत्रोपपादकं। यथा रात्रिभोजनेन विना दिवाऽभुंजानस्य पीनत्वमनुपपन्नमिति ता
दृशपीनत्वमुपपाद्यं। यथा वा रात्रिभोजनस्याभावे तादृशपीनत्वस्यानुपपत्तिरिति रात्रिभोजनमुपपादकं। रात्रिभोजनकल्पनारू
पायां प्रमितावर्थस्यापत्तिः कल्पनेति षष्ठीसमासेनार्थापत्तिशब्दो वर्तते। कल्पनाकरणे पीनत्वादिज्ञाने तु अर्थस्यापत्तिः कल्प

॥श्री॥

नायस्मादिति बहुव्रीहिसमासेन वर्तत इति फलकरणयोरुभयोस्तत्र प्रयोगः॥ सा चार्थापत्तिर्द्विविधा। दृष्टार्थापत्तिः श्रुतार्थापत्तिश्चेति। तत्र दृष्टार्थापत्तिर्य
था। इदं रजतमिति पुरोवर्तिनि प्रतिपन्नस्य रजतस्य नेदं रजतमिति तत्रैव निषिध्यमानत्वं सत्यत्वेऽनुपपन्नमिति रजतस्य सद्भिन्नत्वं सत्वात्यंताभाववत्त्वं वा
मिथ्यात्वं कल्पयति। श्रुतार्थापत्तिर्यथा। यत्र श्रूयमाणवाक्यस्य स्वार्थानुपपत्तिमुखेनार्थांतरकल्पनं। यथा तरति शोकमात्मविदित्यत्र श्रुतस्य शो
कशब्दवाच्यबंधजातस्य ज्ञाननिवर्त्यत्वस्यानुपपत्त्या बंधस्य मिथ्यात्वं कल्प्यते। यथा जीवी देवदत्तो गृहे नेति वाक्यश्रवणानंतरं जीविनो गृहासत्
त्वं बहिः सत्त्वं कल्पयति। श्रुतार्थापत्तिश्च द्विविधा। अभिधानानुपपत्तिः अभिहितानुपपत्तिश्च। तत्र यत्र वाक्यैकदेशश्रवणेऽन्वयाभिधाना
नुपपत्त्यान्वयाभिधानोपयोगिपदांतरं कल्प्यते। तत्राभिधानानुपपत्तिः। यथा द्वारमित्यत्र पिधेहीत्यध्याहारः। यथा वा विश्वजिता यजेतेत्यत्र स्वर्ग
कामपदाध्याहारः। ननु द्वारमित्यादावन्वयाभिधानात्पूर्वमिदमन्वयाभिधानं पिधानोपस्थापकपदं विनाऽनुपपन्नमिति कथं ज्ञानमिति चेत्। न। अ
भिधानपदेन करणाद्युक्तत्वात्तात्पर्यस्य विवक्षितत्वात्। तथा च द्वारकर्मकपिधानक्रियासंसर्गपरत्वं पिधानोपस्थापकपदं विनाऽनुपपन्नमिति ज्ञा
व नेन तत्रापि संभाव्यते। अभिहितानुपपत्तिस्तु। यत्र वाक्यावगतोऽर्थोऽनुपपन्नत्वेन ज्ञातः सन्नर्थांतरं कल्पयति। तत्रेदष्टव्या। यथा ज्योतिष्टो

मेन स्वर्गकामो यजेतेत्यत्र स्वर्गसाधनत्वस्य क्षणिकयागगतस्यानुपपत्त्या मध्यवर्त्यपूर्वं कल्प्यते। न चेयमर्थापत्तिरनुमानेऽन्तर्भवितुमर्ह
ति। अन्वयव्याप्त्यज्ञानेनान्वयिन्यनन्तर्भावात्। व्यतिरेकिणश्चानुमानत्वं प्रागेव निरस्तं। अत एवार्थापत्तिस्थले अनुमिनोमीति नानुव्य
वसायः। किंत्वनेनेदं कल्पयामीति। नन्वर्थापत्तिस्थले इदमनेन विनानुपपन्नमिति ज्ञानं करणमित्युक्तं। तत्र किमिदं तेन विनाऽनुपप
न्नत्वं। तदभावव्यापकाभावप्रतियोगित्वमिति ब्रूमः। एवमर्थापत्तेर्मानान्तरत्वसिद्धौ व्यतिरेकिनानुमानान्तरं पृथिवी इतरेभ्यो भिद्यते
गंधवत्वात् इत्यादौ गंधवत्त्वमितरभेदं विनानुपपन्नमित्यादिज्ञानस्य करणत्वात्। अत एवानुव्यवसायः पृथिव्यामितरभेदं कल्प
यामीति। वेदांतपरिभाषायामर्थापत्तिपरिच्छेदः॥ इदानीं षष्ठं प्रमाणं निरूप्यते। ज्ञानकरणाजन्याभावानुभवासाधारणकारणमनुपलब्धि
रूपं प्रमाणं। अनुमानजन्यातींद्रियाभावानुभवहेतावनुमानादावतिव्याप्तिवारणाय अजन्यांतं। अदृष्टादौ साधारणकारणेऽतिव्याप्तिवा
रणाय असाधारणेति। अभावस्मृत्यसाधारणहेतुसंस्कारेऽतिव्याप्तिवारणायानुभवेति विशेषणं। न चाभावानुमितिस्थलेऽप्यनुपलब्ध्यैवाभावो गृ
ह्यतां विशेषाभावादिति वाच्यं। धर्माधर्माद्यनुपलब्धिसत्त्वेऽपि तदभावानिश्चयेन योग्यानुपलब्धेरेवाभावग्राहकत्वात्। ननु केयं योग्यानुपल

७श्री

धिः। किं योग्यस्य प्रतियोगिनोऽनुपलब्धिः उत योग्याधिकरणे प्रतियोगिनोऽनुपलब्धिः। नाद्यः। स्तंभे पिशाचादिभेदस्याप्रत्यक्षतापत्तेः। नांत्यः।
आत्मनि धर्माधर्माद्यभावस्यापि प्रत्यक्षतापत्तेरिति चेत् न योग्यासत्त्वाचानुपलब्धिश्चेति कर्मधारयाश्रयणात्। अनुपलब्धेर्योग्यता च। तर्कि-
तप्रतियोगिसत्त्वप्रसंजितप्रतियोगिकत्वं। यस्याभावो गृह्यते तस्य सप्रतियोगी तस्य सत्त्वेनाधिकरणे तर्कितेन प्रसंजनयोग्यमापादनयोग्यं
प्रतियोग्युपलब्धिस्वरूपं यस्यानुपलंभस्य तत्त्वं तस्याऽनुपलब्धेर्योग्यत्वमित्यर्थः। तथाहि। स्फीतालोकवति भूतले यदि घटः स्यात्तदा घ-
टोपलंभः स्यादित्यापादनसंभवात्। तादृशभूतले घटाभावः अनुपलब्धिगम्यः। अंधकारे तादृशापादनाभावान्नानुपलब्धिगम्यता। स्तंभे ता-
दात्म्येन पिशाचसत्त्वे सत्त्वं भवन्प्रत्यक्षतापत्त्यान्तरभावः अनुपलब्धिगम्यः आत्मनि धर्मादिसत्त्वेपि तस्यातींद्रियतया निरुक्तोपलंभापादना-
संभवात् न धर्माद्यभावस्यानुपलब्धत्वं। ननु तत्तरीत्या अधिकरणेंद्रियसन्निकर्षस्यालोकाभावस्यानुपलब्धत्वमनुमतं तत्र क्लृप्तेंद्रियमेवाभावाका-
रवृत्तावपि करणं इंद्रियान्वयव्यतिरेकानुविधानादिति चेत् न। प्रतियोग्यनुपलब्धेरपि अभावग्रहहेतुत्वेन क्लृप्तत्वेन करणत्वमात्रस्य
कल्पनात्। इंद्रियस्य चाभावेन समं सन्निकर्षाभावेन चाभावग्रहाहेतुत्वात्। इंद्रियान्वयव्यतिरेकयोरधिकरणज्ञानाद्युपक्षीणत्वेनान्य-

भा

थासिद्धेः। ननु भूतले घटो नेत्याद्यभावानुभवस्थले भूतलांशे प्रत्यक्षत्वमुभयसिद्धमिति तत्र वृत्तिनिर्गमनस्यावश्यकत्वेन भूतलावच्छिन्नचै
तन्यवत्तन्निष्ठघटाभावावच्छिन्नचैतन्यस्यापि प्रमातृभिन्नतया घटाभावस्य प्रत्यक्षत्वं सिद्धांतेपीति चेत्। सत्यं। अभावप्रतीतेः प्रत्यक्ष
त्वेपि तत्करणस्यानुपलब्धेर्मानांतरत्वात्। न हि फलस्य प्रत्यक्षत्वे तत्करणस्य प्रत्यक्षप्रमाणतानियमः। तत्त्वमसि दशमस्त्वमसीत्यादि
वाक्यजन्यज्ञानस्य प्रत्यक्षत्वेपि तत्करणस्य वाक्यस्य प्रत्यक्षप्रमाणभिन्नप्रमाणत्वाभ्युपगमात्। फलवैजात्यं विना कथं प्रमाणभे
द इति चेत्। न। वृत्तिवैजात्यमात्रेण प्रमाणवैजात्योपपत्तेः। तथा च घटाभावाकारा वृत्तिर्नेंद्रियजन्या इंद्रियस्य विषयेणासन्निकर्षात्।
किंतु घटानुपलब्धिरूपमानांतरजन्येति भवत्यनुपलब्धेर्मानांतरत्वं। ननु अनुपलब्धिरूपमानांतरपक्षेप्यभावप्रतीतेः प्रत्यक्षत्वे घटव
ति घटाभावभ्रमस्यापरोक्षतापत्तौ तत्रापि निर्वचनीयघटाभावोऽभ्युपगम्येत। न चेष्टापत्तिः। तस्य मायोपादानकत्वे भावत्वापत्तेः।
मायोपादानकत्वाभावे मायायाः सकलकार्योपादानत्वानुपपत्तिरिति चेन्न। घटवति घटाभावभ्रमे न तत्कालोत्पन्नघटाभावविषयकः किं
घ तु भूतलरूपादौ विद्यमानो लौकिको घटाभाव आरोप्यत इत्यख्यातिर्वा आरोप्यसन्निकर्षस्थले सर्वत्रान्यथाख्यातेरेव व्यवस्थापनात्

अस्त्वायमस्तियोगिमुक्तितदभावघ्यमस्थलेनदभावस्यानिर्वचनीयत्वंतथापितदुपादानंमायैव। नह्युपादानोपादेययोरत्यंतसाजात्यं। तंतुपटयोरपि
तंतुत्वपटत्वादिनावैजात्यात्। यत्किंचित्साजात्यं मायायाअनिर्वचनीयघटाद्यभावस्य च मिथ्यात्वधर्मस्य विद्यमानत्वात्। अन्यथा व्यावहारिकघट
प्रभावं मतिकथं मायोपादानमितिकुतो नाशंकेथाः। नच विजातीययोरप्युपादानोपादेयभावे ब्रह्मैव जगदुपादानं स्यादिति वाच्यं। प्रपंचप्रमा
धिष्ठानत्वरूपस्य ब्रह्मण्यसत्वात्। परिणामित्वरूपस्योपादानत्वस्य निरवयवे ब्रह्मण्यनुपपत्तेः। तथा च प्रपंचस्य परिणाम्युपादानं मायावास्त्वेति
सिद्धांत इत्यलमतिप्रसंगेन। स चाभावश्चतुर्विधः। प्रागभावः प्रध्वंसोत्यंताभावोन्योन्याभावश्चेति। मृत्पिंडादौ कारणे कार्यस्य घटादेरुत्प
त्तेः पूर्वं योभावः स प्रागभावः। स च भविष्यतीतिप्रतीतिविषयः। तत्रैव घटस्य मुद्गरपातानंतरं योभावः स प्रध्वंसः। ध्वंसस्यापि स्वाधिकरणकपा
लनाशे नाशएव। न चैवं घटे उन्मज्जनापत्तिः ध्वंसध्वंसस्यापि घटप्रतियोगिकध्वंसत्वात्। अन्ये प्रागभावध्वंसात्मकघटस्य विनाशे प्रागभावो था
न्मज्जनापत्तिः। न चैवमपि यत्र ध्वंसाधिकरणं नित्यं तत्र कथं ध्वंसनाश इति वाच्यं। तादृशमधिकरणं यदि चेतन्यव्यतिरिक्तं तदा तस्य नित्यत्वमसिद्धं
ब्रह्मव्यतिरिक्तस्य सर्वस्य ब्रह्मज्ञाननिवर्त्यतायावक्ष्यमाणत्वात्। यदि च ध्वंसाधिकरणं चैतन्यं तदा सिद्धिः आरोपितप्रतियोगिकध्वंसस्याधिष्ठा

नमात्रत्वात्। तदुक्तं। अधिष्ठानावशेषो हि नाशः कल्पितवस्तुन इति। एवं शुक्तिरूप्यविनाशोपि इदमवच्छिन्नचैतन्यमेव। यत्राधिकरणे यस्य
कालत्रयेप्यभावः सोत्यन्ताभावः। यथा वायौ रूपात्यन्ताभावः सोपि वियदादिवद्ध्वंसप्रतियोग्येव इदमिदं नेति प्रतीतिविषयोन्योन्याभावः अ
यमेव विभागो भेदः पृथक्त्वं चेति व्यवह्रियते। भेदातिरिक्तपृथक्त्वादौ प्रमाणाभावात्। अयं चान्योन्याभावोऽधिकरणस्य सादित्वे सादिः
यथा घटे पटभेदः। अधिकरणस्यानादित्वेऽनादिरेव। यथा जीवे ब्रह्मभेदः ब्रह्मणि वा जीवभेदः। द्विविधोपि भेदो ध्वंसप्रतियोग्येव। अविद्यानि
वृत्तौ तत्परतंत्राणां निवृत्त्यवश्यंभावात्। पुनरपि भेदो द्विविधः सोपाधिको निरुपाधिकश्चेति। तत्रोपाधिसत्ताव्याप्यसत्ताकत्वं सोपाधित्वं। तदन्य
त्वं निरुपाधिकत्वं। तत्राद्यो यथा। एकस्यैवाकाशस्य घटाद्युपाधिभेदेन भेदः। यथा वा एकस्य सूर्यस्य जलभाजनभेदेन भेदः। यथा वा एकस्य
ब्रह्मणोन्तःकरणभेदाद्भेदः। निरुपाधिभेदो यथा। घटे पटभेदः। न च ब्रह्मणि स्वगतभेदाभ्युपगमे अद्वैतविरोधः। तात्त्विकभेदादेरनभ्युपगमे
न वियदादिवदद्वैताव्याघातात्। तदुक्तं सुरेश्वराचार्यैः। अक्षमा भवतः केयं साधकत्वप्रकल्पने। किं न पश्यसि संसारं तत्रैवाज्ञानकल्पितमि
ति। अत एव विवरणे विद्यानुमाने प्रागभावव्यतिरिक्तत्वविशेषणं संगच्छते। एवं चतुर्विधाभावानां योग्यानुपलब्ध्या प्रतीतिः। तत्रानु
पलब्धिर्मानान्तरं। एवमुक्तानां प्रमाणानां प्रामाण्यं स्वतएवोत्पद्यते। ज्ञायते च। तथा हि स्मृत्यनुभवसाधारणं संवादिप्रवृत्त्यनु

२ तत्त्वप्रदीपिकाविद्यालक्षणे भावत्वं विशेषणं २

फलं तद्वत्ति तत्प्रकारकत्वं ज्ञानस्य प्रामाण्यं। तच्च ज्ञानसामान्यसामग्रीप्रयोज्यं न त्वधिकं गुणमपेक्षते। प्रमामात्रेऽनुगतगुणाभावा
त्। नापि प्रत्यक्षप्रमायां भूयोऽवयवेंद्रियसन्निकर्षः रूपादिप्रत्यक्षे आत्मप्रत्यक्षे च तदभावात्। सत्यपि तस्मिन् पीतः शंख इति प्रत्यक्षस्य
भ्रमत्वाच्च। अत एव न सल्लिंगकपरामर्शादिकमपि अनुमित्यादिप्रमायां गुणः। असल्लिंगपरामर्शादितोऽपि विषयाबाधेनानुमित्यादेः
प्रमात्वात्। न चैवमप्रमापि प्रमा स्यात् ज्ञानसामान्यसामग्र्या अविशेषादिति वाच्यं। दोषाभावस्यापि हेतुत्वांगीकारात्। न चैवं परतस्त्वं आग
न्तुकभावकारणापेक्षायामेव परतस्त्वात्। ज्ञायते च प्रामाण्यं स्वतः स्वतो ग्राह्यत्वं च। दोषाभावे सति यावत्स्वाश्रयग्राहकसामग्रीग्रा
ह्यत्वं। स्वाश्रयो व्यक्तिज्ञानं तद्ग्राहकं साक्षिज्ञानं तेन व्यक्तिज्ञाने गृह्यमाणे तद्गतं प्रामाण्यमपि गृह्यते न चैवं प्रामाण्यसंशयानुपपत्तिः
तत्र संशयानुरोधेन दोषस्यापि सत्त्वेन दोषाभावघटितस्वाश्रयग्राहकाभावेन तत्र प्रामाण्यस्यैवाग्रहात्। यद्वा यावत्स्वाश्रयग्राहक
ग्राह्यत्वयोग्यत्वं स्वतस्त्वं। संशयस्थले प्रामाण्यस्योक्तयोग्यतासत्त्वेऽपि दोषवशेनाग्रहान्न संशयानुपपत्तिः। अप्रामाण्यं तु न ज्ञानसामा
न्यसामग्रीप्रयोज्यं। प्रमायामपि अप्रामाण्यापत्तेः। किंतु दोषप्रयोज्यं। नाप्यप्रामाण्यं यावत्स्वाश्रयग्राहकग्राह्यं अप्रामाण्यघटकत
दभाववत्त्वादेर्व्यक्तिज्ञानानुपनीतत्वेन साक्षिणाऽग्रहीतुमशक्यत्वात्। किंतु विसंवादिप्रवृत्त्यादिलिंगकानुमित्यादिविषय इति परत
एवाप्रामाण्यमुत्पद्यते। ज्ञायते च॥ इत्यनुपलब्धिप्रामाण्यनिरूपणयोः परिच्छेदः॥ श्रीमद्विठ्ठलदीक्षितश्रीतात्याख्यगुरुपदारविंदाय नमः॥

वे॰प॰ २२

लं

एवं निरूपितानां प्रमाणानां प्रामाण्यं द्विविधं व्यावहारिकतत्त्वावेदकत्वं पारमार्थिकतत्त्वावेदकत्वं चेति। तत्र ब्रह्मस्वरूपावगाहिप्रमाणव्यतिरि-
क्तानां सर्वप्रमाणानामाद्यं प्रामाण्यं। तद्विषयाणां व्यवहारदशायां बाधाभावात्। द्वितीयं तु जीवब्रह्मैक्यपराणां सदेव सोम्येदमग्र आसी-
दित्यादीनां तत्त्वमसीत्यंतानां। तद्विषयस्य जीवपरैक्यस्य कालत्रयाबाध्यत्वात्। तच्चैक्यं तत्त्वपदार्थज्ञानाधीनज्ञानमिति प्रथमं तत्पदार्थो
लक्षणप्रमाणाभ्यां निरूप्यते। तत्र लक्षणं द्विविधं। स्वरूपलक्षणं तटस्थलक्षणं चेति। तत्र स्वरूपमेव लक्षणं स्वरूपलक्षणं। यथा
सत्यं ज्ञानमनंतं ब्रह्मेत्यत्र सत्यादिकं स्वरूपलक्षणं। ननु स्वस्य स्ववृत्तित्वाभावात् कथं लक्षणत्वमिति चेन्न। स्वस्यैव स्वापेक्षया धर्मि-
धर्मभावकल्पनया लक्षणत्वसंभवात्। तदुक्तं। आनंदो विषयानुभवो नित्यत्वं चेति संति धर्माः। अपृथक्त्वेपि चैतन्यात्पृथगिवावभा-
संत इति। तटस्थलक्षणं नाम यावल्लक्ष्यकालमनवस्थितत्वे सति यद्व्यावर्तकं तदेव। यथा गंधवत्त्वं पृथिवीलक्षणं। महाप्रलये परमा-
णुषु उत्पत्तिकाले घटादिषु गंधाभावात्। प्रकृते च जन्मादिकारणत्वं। अत्र जगत्पदेन कार्यजातं विवक्षितं। कारणत्वं च कर्तृत्वम-
तोऽविद्यादौ नातिव्याप्तिः। कर्तृत्वं च तत्तदुपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमत्त्वं। ईश्वरस्य तावदुपादानगोचरापरोक्षज्ञान-
सद्भावे च यः सर्वज्ञः सर्वविद्यस्य ज्ञानमयं तपः। तस्मादेतद्ब्रह्म नामरूपमन्नं च जायते इत्यादिर्मानं। तादृशचिकीर्षासद्भावे च श्रुति

॥श्रीराम॥

सोऽकामयत बहु स्यां प्रजायेयेत्यादिश्रुतिर्मानं। तादृशाकृतौ चेतनत्वं नोकुरुतेत्यादिवाक्यं। ज्ञानेच्छाद्यन्यतमगर्भलक्षणत्रितयं विवक्षितं। अन्य
थान्यर्थविशेषणवैयर्थ्यापत्तेः। अत एव जन्मस्थितिध्वंसानामन्यतमस्यैव लक्षणत्वं प्रवेशः। एवं च लक्षणत्रितयं संपद्यते। ब्रह्मणो जगज्जन्मा
दिकारणत्वे च यतो वा इमानि भूतानि जायंते येन जातानि जीवंति यत्प्रयंत्यभिसंविशंतीत्यादिश्रुतिर्मानं। यद्वा निखिलजगदुपादान
त्वं ब्रह्मणो लक्षणं। उपादानत्वं च जगदध्यासाधिष्ठानत्वं जगदाकारेण परिणममानमायाधिष्ठानत्वं वा। एतादृशमेवोपादानत्वम
भिप्रेत्य इदं सर्वं यदयमात्मा सच्च त्यच्चाभवत् बहु स्यां प्रजायेयेत्यादिश्रुतिषु ब्रह्मप्रपंचयोस्तादात्म्यव्यपदेशः। घटः सन् घ
टो भाति घट इष्ट इत्यादिलौकिकव्यवहारोऽपि सच्चिदानंदरूपब्रह्मैक्याध्यासात्। नन्वानंदात्मकचिद्रूपाध्यासात् घटादेरिष्टत्वव्य
ख वहार इष्टः स्यात् पित्ताध्यासात् तत्रापि इष्टत्वादिव्यवहारापत्तिरिति चेन्न। आरोपे सति निमित्तानुसरणं न तु निमित्तमस्तीत्यारोप इत्य
भ्युपगमेन दुःखादौ सच्चिदंशाध्यासेऽप्यानंदांशाध्यासाभावात्। जगति नामरूपद्वारा हि व्यवहारस्तु अविद्यापरिणामात्म
क नामरूपसंबंधात्। तदुक्तं। अस्ति भाति प्रियं रूपं नाम चेत्यंशपंचकं। आद्यत्रयं ब्रह्मरूपं तेनु म. ध्यत इति। अथ सृष्टि
निरूपणं। सर्गाद्यकाले परमेश्वरः स्रक्ष्यमाणप्रपंचवैचित्र्यहेतुप्राणिकर्मसहकृतोऽपरिमितानि रूपितवानिति विशेषवि

जगद्रूपं ततो द्वयं॥

45

वे०प०२३॥

तः

शिष्टमायासहितः सन्नामरूपात्मकं निखिलप्रपंचप्रथां बुद्धावाकलय्येदं करिष्यामीति संकल्पयति। तदैक्षत बहु स्यां प्रजायेयेति। सोऽका-
मयत बहु स्यां प्रजायेयेति श्रुतेः। ततः आकाशादीनि पंचमहाभूतानि अपंचीकृतानि तन्मात्रपदप्रतिपाद्यानि उत्पद्यंते। तत्रा-
काशस्य शब्दो गुणः वायोस्तु शब्दस्पर्शौ तेजसस्तु शब्दस्पर्शरूपाणि अपां तु शब्दस्पर्शरूपरसाः पृथिव्यास्तु शब्दस्पर्शरूपरसगंधाः।
नतु शब्दस्याकाशमात्रगुणत्वं वाय्वादावपि तदुपलंभात्। न चासौ भ्रमः बाधकाभावात्। इमानि भूतानि त्रिगुणमायाका-
र्याणि त्रिगुणानि। एतेभ्यः सत्त्वगुणोपेतेभ्यः पंचभूतेभ्यः श्रोत्रत्वक्चक्षूरसनघ्राणानि पंचेंद्रियाणि तैः सहितैः मनोबुद्ध्यहंकारचित्ता-
नि जायंते। श्रोत्रादीनां क्रमेण दिग्वातार्कवरुणाश्विनोऽधिष्ठातृदेवताः। मनआदीनां चतुर्णां क्रमेण चंद्राच्युतशंकरचतुर्मुखाः
अधिष्ठातृदेवताः। एतेभ्य एव रजोगुणोपेतेभ्यः पंचभूतेभ्यः एकैकेभ्यो वाक्पाणिपादपायूपस्थानि कर्मेंद्रियाणि जायंते। तेषां च क्रमेण व-
ह्नींद्रोपेंद्रमृत्युप्रजापतयोऽधिष्ठातृदेवताः। रजोगुणोपेतेभ्यः पंचभूतेभ्य एव पंच वायवः प्राणापानव्यानोदानसमानाख्या जायंते।
तत्र प्राग्गमनवान्वायुः प्राणः नासादिस्थानवर्ती। अवाग्गमनवानपानः पाय्वादिस्थानवर्ती। विष्वग्गमनवान्व्यानः अखिलश-
रीरवर्ती। ऊर्ध्वगमनवानुदानः कंठस्थानवर्ती। अशितपीतादिसमीकरणकरः समानः। तेभ्य एव तमोगुणोपेतेभ्यः पंचीकृ-

46

नभूतैः पंचीकृतभूतानि जायंते। तासां त्रिवृतं त्रिवृतमेकैकां करवाणीति त्रिवृत्करणस्य पंचीकरणोपलक्षणार्थत्वात् पंचीकरण
प्रकारस्त्वेवं। आकाशं द्विधा विभज्य तयोरेकं भागं पुनश्चतुर्धा विभज्य तेषां चतुर्णां मंशानां वाय्वादिषु चतुर्षु भूतेषु संयोजनं।
एवं वायुं द्विधा विभज्य तयोरेकं भागं चतुर्धा विभज्य तेषां चतुर्णामंशानां आकाशादिषु योजनं। एवं तेजोवारीनामपि। तदेवमेकैकभू
तस्यार्द्धं स्वांशात्मकमर्द्धमितरचतुर्भूतमयमिति। पृथिव्यादेः स्वांशाधिक्यात् पृथिव्यादिव्यवहारः। तदुक्तं। वैशेष्यात्तु तद्वादस्त
द्वाद इति। पूर्वोक्तेभ्यः पंचीकृतभूतेभ्यो लिंगशरीरं परलोकयात्रानिर्वाहकं मोक्षपर्यंतस्थायि मनोबुद्धिभ्यामुपेतं ज्ञानेंद्रियपंचककर्मेंद्रियपंचकप्राणादि
पंचकसंयुक्तं जायते। तदुक्तं। पंचप्राणमनोबुद्धिदशेंद्रियसमन्वितं। अपंचीकृतभूतोत्थं सूक्ष्मांगं भोगसाधनमिति। तच्च द्विविधं। परमपरं च। परं
हिरण्यगर्भलिंगशरीरं। अपरमस्मदादिलिंगशरीरं। तत्र हिरण्यगर्भलिंगशरीरं महत्तत्त्वं। अस्मदादिलिंगशरीरं चाहंकार इत्याख्यायते। एवं त
मोगुणयुक्तेभ्यः पंचीकृतभूतेभ्यो भूम्यंतरिक्षस्वर्गमहर्जनस्तपःसत्यात्मकस्योर्ध्वलोकसप्तकस्य अतलपातालवितलसुतलतलातलरसा
तलमहातलाख्याधोलोकसप्तकस्य ब्रह्मांडस्य जरायुजांडजस्वेदजोद्भिज्जाख्यचतुर्विधस्थूलशरीराणां चोत्पत्तिः। तत्र जरायुभ्यो जा
तानि मनुष्यपश्वादिशरीराणि। अंडजानि अंडेभ्यो जातानि पक्षिपन्नगादिशरीराणि। स्वेदजानि स्वेदाज्जातानि यूकामशकादीनि। उद्भि

वंप्यकरण।

दि

ज्ञानितु भूमिसु द्विधा ज्ञातानि निकृष्टोत्कृष्टादीनि। उत्कृष्टानामपि पापफलभोगायतनत्वेन शरीरत्वं। तत्र परमेश्वरस्य पंचतन्मात्राद्युत्पत्तौ सत्सं
कल्पवत्त्वोपेतलिंगशरीरोत्पत्तौ च साक्षात्कर्तृत्वं। इतरनिखिलप्रपंचोत्पत्तौ हिरण्यगर्भद्वारा। हन्ताहमिमास्तिस्रो देवता अनेन जीवेनात्म
नानुप्रविश्य नामरूपे व्याकरवाणीति श्रुतेः। हिरण्यगर्भः समवर्तताग्रे इत्यादिश्रुतेः। एवंभूतयोनिकेश्वरस्य चिन्निरूपिता। इदानीं प्रलयो नि
रूप्यते। प्रलयो नाम त्रैलोक्यनाशः। स चतुर्विधः। नित्यः प्राकृतः नैमित्तिक आत्यन्तिकश्चेति। तत्र नित्यप्रलयः सुषुप्तिः। तस्याः सकल
कार्यप्रविलयरूपत्वात्। धर्माधर्मपूर्वसंस्काराणां च तत्र कारणात्मनावस्थानं। तेन सुषुप्तौ स्थितस्य न सुखदुःखाद्युपलब्धिः णनिवृ
न्वास्मरणानुपपत्तिः। न च सुषुप्तावन्तःकरणस्य विनाशो न तदधीनप्राणादिक्रियानुपपत्तिः। वस्तुतः स्वास्थ्याभावे एतदुपलब्धेः पुरु
षान्तरविभ्रमप्रमात्वात्। सुप्तशरीरे प्रलयो भवति। ननु एवं सुप्तस्य परेतात् विशेषः। सुप्तस्य हि लिंगशरीरं संस्कारात्मना तत्रैव वर्तते।
परेतस्य तु लोकान्तर इति वैलक्षण्यात्। यद्यन्तःकरणस्य द्वे शक्ती ज्ञानशक्तिः क्रियाशक्तिश्चेति। तत्र ज्ञानविशिष्टान्तःकरणस्य नाशः न क्रियाशक्ति
विशिष्टस्य प्राणादिरूपेणावस्थानमविरुद्धं। यदा सुप्तः स्वप्नं न कंचन पश्यति। अथास्मिन् प्राण एवैकधा भवति। अथैनं वाक् सर्वैर्नामभिः सहाप्ये
ति सता सोम्य तदा सम्पन्नो भवति स्वमपीतो भवतीत्यादिश्रुतिरस्य सुषुप्तौ मानं। प्राकृतप्रलयस्तु कार्यब्रह्मविनाशनिमित्तकः सक
लकार्यनाशः। यदा प्रागेवोत्पन्नब्रह्मसाक्षात्कारस्य कार्यब्रह्मणो ब्रह्माण्डाधिकारप्रारब्धकर्मसमाप्तौ विदेहकैवल्यात्मिका परा मुक्तिः

सह

सत्यलोकवासिनामुत्पन्नब्रह्मसाक्षात्काराणां ब्रह्मणा विदेहकैवल्यं। ब्रह्मणा सह ते सर्वे संप्राप्ते प्रतिसंचरे। परस्यान्ते कृतात्मानः प्र
विशन्ति परं पदमिति श्रुतेः। एवं स्वलोकवासिभिः सह कार्यब्रह्मणि मुच्यमाने तदधिष्ठितब्रह्माण्डं तदन्तर्वर्तिनिखिललोकं तद्गतस्था
वरादीनां भौतिकानां भूतानां च प्रकृतौ मायायां लयः न तु ब्रह्मणि। बाधरूपविनाशस्यैव ब्रह्मनिष्ठत्वादतः प्राकृत इत्युच्यते। कार्य
ब्रह्मणो दिवसावसाननिमित्तकस्त्रैलोक्यविनाशो नाम प्रलयो नैमित्तिकप्रलयः। ब्रह्मदिवसश्च चतुर्युगसहस्रपरिमितः कालः। च
तुर्युगसहस्राणि ब्रह्मणो दिनमुच्यते इत्यादिवचनात्। [illegible] कालो दिवसकालपरिमितः रात्रिकालस्य दिवसकालतुल्यत्वात्। प्रा

प्रलय

कृतप्रलये नैमित्तिकप्रलये च पुराणवचनानि प्रमाणानि। द्विपरार्द्धे त्वतिक्रान्ते ब्रह्मणः परमेष्ठिनः। तदा प्रकृतयः सप्त कल्प्यन्ते प्र
लयाय हि। एष प्राकृतिको राजन् प्रलयो यत्र लीयते। इति वचनं प्राकृतिकप्रलये मानं। एष नैमित्तिकः प्रोक्तः प्रलयो यत्र विश्व
सृक्। शेतेऽनन्तासने नित्यमात्मसात्कृत्य चात्मभूः। इति वचनं नैमित्तिकप्रलये मानं। तुरीयप्रलयस्तु ब्रह्मसाक्षात्कारनिमित्तः
सर्वमोक्षः। स च एकजीववादे युगपदेव। नानाजीववादे क्रमेण। सर्वा एकीभवन्तीत्यादिश्रुतेः। तत्राद्यास्त्रयोऽपि लयाः कर्मोपरमनिमि
त्ताः। तुरीयस्तु ज्ञानोदयनिमित्तो लयो ज्ञानेन सहैवेति विशेषः। एवं चतुर्विधः प्रलयो निरूपितः। तस्येदानीं क्रमो निरूप्यते।

३०२५

भूतानां भौतिकानां च न कारणलयक्रमेण लयः कारणलयसमये कार्याणामाश्रयमंतरेणावस्थानानुपपत्तेः किंतु सृष्टिक्रमविपरी-
तक्रमेण। तत्तत्कार्यनाशे तत्तज्जनकादृष्टनाशस्यैव प्रयोजकत्वे उपादाननाशस्यानप्रयोजकत्वात्। अन्यथा न्यायमतेपि महाप्र-
लये पृथ्वीपरमाणुगतरूपरसादेर्विनाशापत्तेः। तथा च पृथिव्या अप्सु अपां तेजसि तेजसो वायौ वायोराकाशे आकाशस्य
जीवाहंकारे तस्य जीवहिरण्यगर्भेहंकारे तस्य चाविद्यायामित्येवं रूप एव प्रलयः। तदुक्तं विष्णुपुराणे। जगत्प्रतिष्ठा देवर्षे पृथिव्य-
प्सु प्रलीयते। तेजस्यापः प्रलीयंते तेजो वायौ प्रलीयते। वायुः प्रलीयते व्योम्नि तच्चाव्यक्ते प्रलीयते। अव्यक्तं पुरुषे ब्रह्मन्निष्कले
संप्रलीयते॥७॥ इत्येवंविधप्रलयकारणत्वेन तस्य सार्थस्य ब्रह्मणस्तटस्थलक्षणं। ननु वेदांतैर्ब्रह्मणो जगत्कारणत्वेन प्रतिपाद्यमाने सति सप्र-
पंचं ब्रह्म स्यात्। अन्यथा सृष्टिवाक्यानामप्रामाण्यापत्तिरिति चेन्न। न हि सृष्टिवाक्यानां सृष्टौ तात्पर्यं किंतु द्वितीयब्रह्मण्येव। तत्प्रतिप-
त्तौ कथं सृष्टेरुपयोगः इत्थं। यदि सृष्टिमनुपन्यस्य निषेधो ब्रह्मणि प्रतिपाद्येत तदा ब्रह्मणि प्रतिषिद्धस्य प्रपंचस्य वाथो प्रतिषिद्धस्य
रूपस्यैव ब्रह्मणोन्यत्रावस्थानशंकायां निर्विचिकित्समद्वितीयत्वेन प्रतिपादितं स्यात्। ततः सृष्टिवाक्यानां ब्रह्मोपादानत्वज्ञाने स-
ति उपादाने विना कार्यस्यान्यत्र सद्भावशंकाया निरस्तायां नेह नानास्तीत्यादिना ब्रह्मण्यपि तस्यासत्त्वोपपादने प्रपंचस्य तुच्छत्वावगमे

नो

निरस्तनिखिलद्वैतविभ्रममखण्डं सच्चिदानन्दैकरसं ब्रह्म सिध्यतीति परंपरया सर्ववाक्यानामप्यद्वितीये ब्रह्मण्येव तात्पर्यं। उपासनाप्र-
(सगुण) करणपठितं ब्रह्मवाक्यानां उपासनाविध्यपेक्षितगुणारोपमात्रपरत्वं। निर्गुणप्रकरणपठितानां तु निषेधवाक्यापेक्षितनिषेध्यसमर्प-
कत्वेन विनियोग इति न किंचिदपि वाक्यमद्वितीयब्रह्मप्रतिपादनेन विरुध्यते। तदेवं स्वरूपतटस्थलक्षणलक्षिततत्पदार्थमीश्व-
रचैतन्यं मायायां प्रतिबिम्बरूपमित्येके। केचित्तु तेषामयमाशयः जीवपरमेश्वरसाधारणं चैतन्यमात्रं बिम्बं तस्यैव बिम्बस्याविद्यात्मिकायां
मायायां प्रतिबिम्बमीश्वरचैतन्यं। अन्तःकरणेषु प्रतिबिम्बितं जीवचैतन्यं। कार्योपाधिरयं जीवः कारणोपाधिरीश्वर इति श्रुतेः। एतन्म-
ते जलाशयगताकाशवगतसूर्यप्रतिबिम्बयोरिव जीवपरयोर्विभेदः। अविद्यात्मकोपाधेर्व्यापकतया तदुपाधिकेश्वरस्यापि व्यापकत्वं।
अन्तःकरणस्य परिच्छिन्नतया तदुपाधिकजीवस्यापि परिच्छिन्नत्वं। एतन्मते अविद्या[illegible]तादोषाः जीव एव परमेश्वरे[illegible]। उपाधेः प्रति-
बिम्बपक्षपातित्वादित्यु। स्वरसात्। बिम्बात्मकमीश्वरचैतन्यमित्यपरे। तेषामयमाशयः एकमेव चैतन्यं बिम्बत्वाक्रान्तमीश्वरचैतन्यं प्र-
तिबिम्बत्वाक्रान्तं जीवचैतन्यं बिम्बप्रतिबिम्बकल्पनोपाधिश्च एकजीववादे अविद्या अनेकजीववादे तु अन्तःकरणान्येव। अविद्यान्तःक-
रणरूपोपाधिसम्पृक्तो जीवपरभेदः। उपाधिकृतदोषाश्च प्रतिबिम्बे जीव एव वर्तन्ते। न तु बिम्बे परमेश्वरे। उपाधेः प्रतिबिम्बपक्षपा-
तित्वात्। एतन्मते च गगनसूर्यस्य जलादौ भासमानप्रतिबिम्बसूर्यस्येव जीवपरयोर्भेदः। ननु ग्रीवास्थमुखस्य दर्पणप्रदेश इव

51

बिंबचैतन्यपरमेश्वरस्य जीवमदेशे भावान्तस्य सर्वांतर्यामित्वं न स्यादिति चेन्न। स्वाभवनं भ्रनुस्याकाशस्य जलादौ प्रतिबिंबितत्वे बिंब
भूतमहाकाशस्यापि जलादिमदेशासंबंधदर्शनेन परिच्छिन्नबिंबस्य प्रतिबिंबदेशासंबंधित्वेपि अपरिच्छिन्नस्य बिंबस्य प्रतिबिंब
देशासंबंधाविरोधात्। न च रूपहीनस्य ब्रह्मण प्रतिबिंबसंभवः रूपवत एव तथा दर्शनादिति वाच्यं। नीरूपस्यापि रूपस्य प्रति
बिंबदर्शनात्। न च नीरूपस्य प्रतिबिंबाभावनियमः। आत्मनो द्रव्यत्वाभावस्योक्तत्वात्। एकधा बहुधा चैव दृश्यते जलचंद्रवत्
यथाह्ययं ज्योतिरात्मा विवस्वानपो भिन्ना बहुधैकोनुगच्छन्नित्यादिवाक्येन ब्रह्मप्रतिबिंबाभावानुमानस्य बाधितत्वाच्च। तदेवं त
त्पदार्थो निरूपितः। इदानीं त्वंपदार्थो निरूप्यते। एकजीववादे अविद्याप्रतिबिंबो जीवः। अनेकजीववादे अंतःकरणप्रतिबिंबः। स च
जाग्रत्स्वप्नसुषुप्तिरूपावस्थात्रयवान्। तत्र जाग्रद्दशा नाम इंद्रियजन्यज्ञानावस्था। अवस्थांतरे इंद्रियाभावान्नातिव्याप्तिः। इंद्रियजन्य
ज्ञानेन अंतःकरणवृत्तिः स्वरूपज्ञानस्यानादित्वात्। सा चांतःकरणवृत्तिरावरणाभिभवार्थेत्येकं मतं। तथा हि। अविद्योपहितचैतन्य



स्य जीवत्वपक्षे घटाद्यधिष्ठानचैतन्यस्य जीवरूपतया जीवस्य सर्वदा घटादिभानप्रसक्तौ घटाद्यवच्छिन्नचैतन्यावरकमज्ञानं मूलावि
द्यापरतंत्रं अवस्थापदवाच्यमभ्युपगंतव्यं। एवं सति न घटादेर्भानप्रसंगः। अनावृतचैतन्यस्यैव भानप्रयोजकत्वात्।
तस्यावरणस्य सत्तानत्वे कदाचिदपि घटभानं न स्यादिति तद्भंगकत्वेन तद्भंगजनकं च चैतन्यमात्रं तदज्ञानस्य न दनि

॥ यीसीता॥

वर्तकत्वात्। नापि व्यवहितं चैतन्यं परोक्षस्थलेपि तन्निवृत्त्यापत्तेरिति परोक्षस्थले व्यावृत्तत्वं निर्विशेषस्य तदुपहितचैतन्यस्यवाआ
वरणभंगजनकत्वमित्यावरणाभिभवार्थेत्यभिव्यज्यते। संबंधार्थोवृत्तिरित्यपरं मतं। तत्राविद्योपाधिकःपरिछिन्नोजीवः सचघ
टादिसंबंधोविद्यमानोपिघटाद्याकाराप्रोक्षवृत्तिविरहदशायां न घटादिकमवभासयति। घटादिनासमसंबंधाभावात्। ततस्त
दाकारवृत्तिदशायां तु भासयति। तदासंबंधसत्वात्। नन्वविद्योपाधिकस्यापरिछिन्नस्यजीवस्यस्वत एव समस्तवस्तुसंबद्धस्यवृ
त्तिविरहदशायां संबंधाभावाभिधानमसंगतं। असंगतत्वे तु संबंधाभावाभिधानेन वृत्त्यनंतरमपि संबंधो न स्यादिति चे
त्। उच्यते। नहि वृत्तिविरहदशायां जीवस्य घटादिना सह संबंधसामान्यं निषेधामः। किंतर्हि घटादिभानप्रयोजकसंबंधविशेषं॥
सच संबंधविशेषोविषयस्य जीवचैतन्यस्य च व्यंग्यव्यंजकतालक्षणः। कादाचित्कस्तदाकारवृत्तिनिबंधनः। तथाहि। तैजस
मंतःकरणं स्वच्छद्रव्यत्वात् स्वतएव जीवचैतन्याभिव्यंजनसमर्थं घटादिकं तु न तथा अस्वच्छद्रव्यत्वात्। स्वाकारवृत्तिसंयोग
दशायां तु वृत्त्यभिभूतजाड्यधर्मकतया वृत्त्युत्पादितचैतन्याभिव्यंजनयोग्यताश्रयतया च वृत्त्युदयानंतरं चैतन्यमभि
व्यनक्ति। तदुक्तं विवरणे। अंतःकरणं हि स्वस्मिन्निव स्वसंसर्गिण्यपि घटादौ चैतन्याभिव्यक्तियोग्यतामापादयतीति। वृ

यास्वच्छद्रव्यस्यापि स्वच्छद्रव्यसंबंधदशायां प्रतिबिंबग्राहित्वं। यथा कुड्यादेर्जलसंयोगदशायां मुखादिप्रतिबिंबग्राहित्वं घटादेरभिव्यंजकत्वे

वें च तत्प्रतिबिंबग्राहित्वं। चैतन्यस्याभिव्यंग्यत्वं तत्प्रतिबिंबितत्वं। एवंविधाभिव्यंजकत्वसिद्ध्यर्थमेव वृत्तेरपरोक्षस्थले बहिर्निर्गमनांगी

कारः। परोक्षस्थले तु वन्ह्यादेर्वृत्तिसंसर्गाभावेन चैतन्यानभिव्यंजकतया नापरोक्षत्वं। एतन्मन्वानेनात्र विवरणाचार्याणां अपरोक्षत्वं चैतन्या

भिव्यंजकत्वमिति दृष्टव्यं। एवं जीवस्यापरिच्छिन्नत्वे वृत्तेः संबंधार्थत्वं प्रतिपादितं। परिच्छिन्नत्वपक्षे वृत्तेः संबंधार्थत्वं प्रतिपाद्यते। तथा

हि। अंतःकरणोपाधिको जीवः तस्य च घटाद्यनुपादानता घटादिदेशासंबंधात्। किंतु ब्रह्मैव घटाद्युपादानं तस्य मायोपहितस्य सक

स लघटान्वयितात्। अत एव ब्रह्मणः सर्वज्ञता। तथा च जीवस्य घटाद्यधिष्ठानब्रह्मचैतन्याभेदमंतरेण घटाद्यवभासासंभवे प्राप्ते तदवभासा

य घटाद्यधिष्ठानब्रह्मचैतन्याभेदसिद्ध्यर्थं घटाद्याकारावृत्तिरिष्यते। ननु वृत्त्यापि कथं प्रमातृचैतन्ययोरभेदः संपाद्यते। घटांतःकर

णस्थोपाधिभेदेन तदवच्छिन्नचैतन्ययोरभेदासंभवादिति चेन्न वृत्तेर्विषयदेशनिर्गमनांगीकारेण वृत्त्यंतःकरणविषयाणामेकदेश

स्थत्वेनोपाधेयभेदाभावस्योक्तत्वात्। एवमपरोक्षस्थले वृत्तेर्मतभेदेन विनियोग उपपादितः। इंद्रियाजन्यविषयगोचरापरोक्षांतः

वृत्त्यवस्था स्वप्नावस्था। जाग्रदवस्थाव्यावृत्त्यर्थमिंद्रियाजन्येति। अविद्यावृत्तिमत्यां सुषुप्तौ अतिव्याप्तिवारणायांतःकरणेति।

सुषुप्तिर्नाम विद्यागोचराविद्यावृत्त्यवस्था। जाग्रत्स्वप्नयोरन्तःकरणवृत्तेर्विद्याकारवृत्तित्वाभावान्नातिव्याप्तिरित्यर्थः। अत्र केचित् मरण
मूर्च्छयोरवस्थान्तरत्वमाहुः। अपरे तु सुषुप्तावेव तयोरन्तर्भावमाहुः। न च तयोरवस्थान्तर्भावे बहिर्भावयोः त्वंपदार्थनिरूपणेऽनुपयोग
भावात् न तत्र प्रयत्यते। तस्य च मायोपाध्यपेक्षया एकत्वं। अन्तःकरणोपाध्यपेक्षया नानात्वं व्यवह्रियते। एतेन जीव ब्रह्म [illegible] एकत्वं मतम्।
बुद्धेर्गुणेनात्मगुणेन चैव आराग्रमात्रो ह्यवरोऽपि दृष्ट इत्यादौ जीवस्य बुद्ध्याद्यवाच्यान्तःकरणपरिच्छिन्नोपाधिकपरि[illegible]श्रवणात्
स च जीवः स्वयंप्रकाशः। स्वप्नावस्थामधिकृत्यात्रायं पुरुषः स्वयंज्योतिरिति श्रुतेः। अनुभवरूपश्च प्रज्ञानघन इति श्रुतेः। अनुभवा
मीति व्यवहारस्तु च चित्प्रतिबिम्बितचैतन्यमादायोपपद्यते। एवं त्वंपदार्थो निरूपितः। अधुना तत्त्वंपदार्थयोरैक्यं महावाक्यप्रतिपाद्यमभि
धीयते। ननु नाहमीश्वर इत्यादिप्रत्यक्षेण किञ्चिज्ज्ञत्वसर्वज्ञत्वविरुद्धधर्माश्रयत्वादिलिङ्गेन द्वा सुपर्णा सयुजेत्यादिश्रुत्या द्वाविमौ पुरुषौ
लोके क्षरश्चाक्षर एव च। क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते इत्यादिस्मृत्या च जीवब्रह्म परभेदस्यावगतत्वेन तत्त्वमस्यादिवाक्यमादित्यो यूपः
यजमानः प्रस्तर इत्यादिवाक्यवदुपचरितार्थमेवेति चेन्न। भेदप्रत्यक्षस्य सम्भावितकरणदोषस्यासम्भावितदोषवेदजन्यज्ञानेन
बाध्यमानत्वात्। अन्यथा चन्द्रगताधिकपरिमाणग्राहिज्योतिःशास्त्रस्य चन्द्रप्रादेशग्राहिप्रत्यक्षेण बाधापत्तेः। पाकरसे घटरस्तो

कादाचित्कई तिरोधः।
भूतानि

वे०प० २८॥

भेद तत्परवाक्ययोः

यं नश्याम इतिवत् सविशेषणे हि न्यति न्यायेन जीवपर[भेद]ग्राहिप्रत्यक्षस्य विशेषणीभूतधर्मभेदविषयत्वात्। अत एव नानुमानम्। नापि प्रमाणं
आगमबाधात् मेरुपाषाणमयत्वानुमानवत्। नाप्यागमान्तरविरोधः। तत्परातत्पर[वाक्ययोः तत्पर]वाक्यस्य प्रबलत्वेन लोकसिद्धभेदा[नु]वादिद्वासुपर्णादि
वाक्यापेक्षयोपक्रमोपसंहाराद्यवगतो हि तात्पर्यविशिष्टस्य तत्त्वमस्यादिवाक्यस्य प्रबलत्वात्। न च जीवपरैक्ये विरुद्धधर्माश्रयत्वेनानु
पपत्तिः। शीतस्यैव जलस्योपाधिकोष्ण्याश्रयत्ववत् स्वभावतो निर्गुणस्यैव जीवस्यान्तःकरणाद्युपाधिकृतकर्तृत्वाद्याश्रयत्वप्रतिभासो
पपत्तेः। यदि जलादावौष्ण्यमारोपितं तदा प्रकृतेपि तुल्यं। न च सिद्धान्ते कर्तृत्वस्य क्वचिदप्यभावादारोपे प्रमाहितसंस्काराभावे कथमा
रोप इति वाच्यं। लाघवेनारोप्यविषयकसंस्कारत्वेनैव तस्य हेतुत्वात्। न च प्राथमिकारोपे का गतिः कर्तृत्वाद्यध्यासप्रवाहस्यानादित्वात्।
तत्त्वंपदवाच्ययोरैक्यायोगेपि लक्ष्यस्वरूपयोरैक्यमुपपादितमेव। अत एव तत्प्रतिपादकतत्त्वमस्यादिवाक्यानामखंडार्थ[त्वं] सोयमि
त्यादिवाक्यवत्। न च कार्यपराणामेव प्रामाण्यं पुत्रस्ते जात इत्यादौ सिद्धेपि संगतिग्रहात्। एवं सर्वप्रमाणाविरुद्धं श्रुतिस्मृतीति
हासपुराणप्रतिपाद्यं जीवपरैक्यं वेदान्तशास्त्रस्य विषय इति सिद्धं। इति वेदान्तपरिभाषायां विषयपरिच्छेदः। इदानीं प्रयोज
नं निरूप्यते। यदवगतं सत्स्ववृत्तितयेष्यते तत्प्रयोजनं। तच्च द्विविधं मुख्यं गौणं चेति। तत्र सुखदुःखाभावौ मुख्यप्रयोजनं।

पि

परि

ह

तदन्यतरसाधनं गौणं प्रयोजनं। सुखं च द्विविधं। सातिशयं निरतिशयं चेति। सातिशयं सुखं विषयानुषंगजनितांतःकरणवृत्तितारत
म्यकृतानंदलेशाविर्भावविशेषः। एतस्यैवानंदस्यान्यानि भूतानि मात्रामुपजीवंतीति श्रुतेः। निरतिशयं तु स्वरूपसुखं ब्रह्मैव। आनंदो ब्रह्मे
तिव्यजानात् विज्ञानमानंदं ब्रह्मेत्यादिश्रुतेः। आनंदात्मकब्रह्मावाप्तिश्च मोक्षः शोकनिवृत्तिश्च। ब्रह्मवेद ब्रह्मैव भवति। तरति शोक
मात्मविदित्यादिश्रुतेः। ननु लोकांतरावाप्तिस्तदन्यवैषयिकानंदो वा मोक्षः। तस्य कृतकत्वेनानित्यत्वे मुक्तस्य पुनरावृत्त्यापत्तेः। न
तु तन्मते आनंदावाप्तेरनर्थनिवृत्तेश्च सादित्वे तुल्यो दोषः। अनादित्वे तु मोक्षमुद्दिश्य श्रवणादौ प्रवृत्त्यनुपपत्तिरिति चेन्न। नि
त्यस्यैव ब्रह्मस्वरूपस्य मोक्षस्य सिद्धत्वेऽपि भ्रमेण तत्साधने प्रवृत्त्युपपत्तेः। अनर्थनिवृत्तिरपि अधिष्ठानभूतब्रह्मस्वरूपतया सिद्ध
वल्लोकेऽप्रिमासमाप्ति परिहर्तेहा। यः प्रयोजनत्वं दृष्टमेवाय यथा हस्तगतविस्मृतसुवर्णादौ तत्र हस्ते सुवर्णमित्याप्तोपदेशा
दप्राप्तमिव प्राप्नोति। यथा वा वलयितचरणया स्रजि सर्पत्वभ्रमवतः नायं सर्पः रज्जुरिति आप्तवाक्यात्परिहृतस्यैव सर्पस्य परिहारः
तद्वं प्राप्तस्याप्यानंदस्य प्राप्तिः परिहृतस्याप्यनर्थस्य निवृत्तिर्मोक्षः। स च श्रवणमननसत्यज्ञानेकसाध्यः। तमेव विदित्वातिमृ
त्युमेति नान्यः पंथा विद्यतेऽयनाय इति श्रुतेः। अज्ञाननिवृत्तेर्ज्ञानैकसाध्यत्वनियमाच्च। तच्च ज्ञानं ब्रह्मात्मैक्यगोचरं। अथ

यं जनक प्राप्तोऽसि तदात्मानमेवावेदहं ब्रह्मास्मीत्यादिश्रुतेः। तत्त्वमस्यादिवाक्योत्थं ज्ञानं मोक्षस्य साधनमिति नारदीयवचनाच्च। तच्च ज्ञा
नमपरोक्षरूपं परोक्षत्वे परोक्षभ्रमनिवर्तकत्वानुपपत्तेः। तच्चापरोक्षज्ञानं तत्त्वमस्यादिवाक्यादिति केचित्। मनननिदिध्यासनसं
स्कृतान्तःकरणादेवेत्यपरे। तत्र पूर्वाचार्याणामयमाशयः। संविदापरोक्ष्यं न करणविशेषोत्पत्तिनिबंधनं किंतु प्रमेयविशेषनिबंध
नमित्युपपादितं। तथा च ब्रह्मणः प्रमात्रभिन्नतया तद्गोचरं शाब्दज्ञानमप्यपरोक्षं। अत एव प्रतर्दनं प्रति प्राणोऽस्मि प्र
ज्ञात्मा तं मामायुरमृतमुपास्वेतीन्द्रोक्तौ प्राणशब्दस्य ब्रह्मपरत्वे निश्चिते सति मामुपास्वेत्यस्यानुपपत्तिमाशंक्य
तदुत्तरत्वेन प्रवृत्ते शास्त्रदृष्ट्या तूपदेशो वामदेववदिति सूत्रे शास्त्रीया दृष्टिः शास्त्रदृष्टिरिति तत्त्वमस्यादिवाक्यजन्यमहं ब्रह्मेति
ज्ञानं दृष्टिशब्देनोक्तमिति। अन्येषां त्वयमाशयः। करणविशेषनिबंधनमेव ज्ञानानां प्रत्यक्षत्वं न विषयविशेषनिबंधनं। एकस्मिन्ने
व सूक्ष्मवस्तुनि पटुकरणापटुकरणयोः प्रत्यक्षाप्रत्यक्षव्यवहारदर्शनात्। तथा च संवित्साक्षात्त्वे इंद्रियजन्यत्वस्यैव प्रयोजकतया न
शाब्दजन्यज्ञानस्यापरोक्षत्वं। ब्रह्मसाक्षात्कारेऽपि मनननिदिध्यासनसंस्कृतं मन एव करणं। मनसैवानुद्रष्टव्यमित्यादिश्रुतेः। म
नसोऽगम्यत्वश्रुतिश्चासंस्कृतमनोविषया। नन्वेवं ब्रह्मण औपनिषदत्वानुपपत्तिः। अस्मदुक्तमननसो वेदजन्यज्ञानानंतर

मेवमप्यनन्तयावेदोपजीवित्वात्। वेदानुपजीविमानान्तरगम्यत्वस्यैव वेदजन्यत्वविरोधित्वात्। शास्त्रदृष्टिस्त्वमपि ब्रह्मविषयमानसप्रत्य
क्षस्य शास्त्रमयोज्यत्वादुपपद्यते। तदुक्तं। अपि संराधने सत्त्वाधारस्वार्थध्यानमाममा। शास्त्रदृष्टिर्मतानां तु वेत्ति वाचस्पतिः पर इति। तस्य
ज्ञानेन पापक्षयात्। स च सर्वकर्मानुष्ठानादिति परंपरया कर्मणां विनियोगः। अत एव तमेतं वेदानुवचनेन ब्राह्मणा विविदिषंति यज्ञेन दाने
न तपसानाशकेनेत्यादिश्रुतिः। कषाये कर्मभिः पक्वे ततो ज्ञानं प्रवर्तत इत्यादिस्मृतिश्च संगच्छते। एवं श्रवणमनननिदिध्यासनान्यपि
ज्ञानसाधनानि। मैत्रेयीब्राह्मणे। आत्मा वा अरे द्रष्टव्य इति दर्शनमनूद्य तत्साधनत्वेन श्रोतव्यो मंतव्यो निदिध्यासितव्य इति श्रवण
मनननिदिध्यासनानां विधानात्। श्रवणं नाम वेदान्तानां ब्रह्मणि तात्पर्यावधारणानुकूला मानसी क्रिया। मननं नाम शब्दावधारितेऽर्थे
मानान्तरविरोधशंकायां तन्निराकरणानुकूलतर्कात्मकज्ञानजनको मानसो व्यापारः। निदिध्यासनं नाम अनादिदुर्वासनया विषयेष्वाकृ
ष्यमाणचित्तस्य विषयेभ्योऽपकृष्य आत्मविषयकस्थैर्यानुकूलो मानसो व्यापारः। तत्र निदिध्यासनं ब्रह्मसाक्षात्कारे साक्षात्कारणं। ने
ध्यानयोगानुगता अपश्यन् देवात्मशक्तिं स्वगुणैर्निगूढामित्यादिश्रुतेः। निदिध्यासने च मननं हेतुः अकृतमननस्यार्थदार्ढ्याभावेन त
द्विषयनिदिध्यासनायोगात्। मनने च श्रवणं हेतुः। श्रवणाभावे तात्पर्यानिश्चयेन शाब्दज्ञानायोगेन श्रुतार्थविषयकयुक्त्ययुक्तत्वनि

श्रवणानुकूलमननादियोगात्। एतानि त्रीण्यपि ज्ञानोत्पत्तौ कारणानि। निदिध्यासने तावन्मात्रे केचिदाचार्या नु चिरे। अपरे तु श्रवणं प्रधानं मनननिदि-
ध्यासनयोस्तु श्रवणात्पराचीनयोरपि श्रवणफलब्रह्मदर्शननिर्वर्तकतया आरादुपकारकतयाङ्गत्वमित्याहुः। तदप्यङ्गत्वं न तात्पर्य-
शेषत्वरूपं। तस्य श्रुत्याद्यन्यतमप्रमाणगम्यस्य प्रकृते श्रुत्याद्यभावे असम्भवात्। तथा हि व्रीहिभिर्यजेत दध्ना जुहोतीत्यादाविव मनन-
निदिध्यासनयोरङ्गत्वेन काचिच्छ्रुतिरस्ति। नापि बर्हिर्देवसदनं दामीत्यादिमन्त्राणां बर्हिःखण्डनप्रकाशनसामर्थ्यवत् किञ्चि-
ल्लिङ्गमस्ति। नापि प्रदेशान्तरपठितस्य वाजपेयस्याग्निष्टोमप्रवर्णं तीति वाक्यस्येव स्रुवेणानुवादेन मनननिदिध्यासनविनियोजकं किञ्चि-
द्वाक्यमस्ति। नापि दर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेति वाक्यावगतफलसाधनताकदर्शपूर्णमासप्रकरणे प्रयाजादीनामिव फलसा-
धनत्वेनावगतस्य श्रवणस्य प्रकरणे मनननिदिध्यासनयोराम्नानम्। ननु द्रष्टव्य इति दर्शनानुवादेन श्रवणे विहिते सति फलवत्तया श्र-
वणं प्रकरणि तत्सन्निधावाम्नातयोर्मनननिदिध्यासनयोः प्रयाजन्यायेन प्रकरणादङ्गत्वमिति चेन्न। ते ध्यानयोगानुगता अपश्यन्
इत्यादिश्रुत्यन्तरे ध्यानस्य दर्शनसाधनत्वेनावगतस्योपाकाङ्क्षायां प्रयाजन्यायेन श्रवणमनननयोरङ्गापत्तेः। अक्रमाससमाख्येन दूर-
निरस्तेः। किञ्च प्रयाजादावङ्गत्वविचारः सप्रयोजनः। पूर्वपक्षे विकृतिषु न प्रयाजानुष्ठानं सिद्धान्ते तु तत्रापि तदनुष्ठानमिति। प्रकृ-

नैश्रवणं न कस्यचित्प्रकृतिः। येन मनननिदिध्यासनयोस्तत्राप्यनुष्ठानमंगत्वफलं भवेत्। तस्मान्नतार्तीयशेषत्वं मनननिदिध्यासनयोः।
किंतु यथा घटादिकार्ये मृत्पिंडादीनां प्रधानकारणता चक्रादीनां सहकारिकारणता तथा प्राधान्याप्राधान्यव्यपदेशः। तथा श्रवणं मनननि
दिध्यासनमपीति मंतव्यं। सन्निहितं चोक्तं द्विवर्णनार्यैः। शक्तितात्पर्यविशिष्टशब्दावधारणं श्रवणं प्रमेयावगमं प्रति अव्यवधानेन कारणं भ
वति। प्रमाणस्य प्रमेयावगमं प्रत्यनव्यवधानात्। मनननिदिध्यासने तु चित्तस्य प्रत्यगात्मप्रवणतासंस्कारपरिनिष्पन्नतदेकाकारवृत्ति
कार्यद्वारेण ब्रह्मानुभवहेतुतां प्रतिपद्येते इति फलं प्रति अव्यवहितकरणविशिष्टशब्दावधारणस्य व्यवहिते मनननिदिध्यासने तदं
गे अंगीक्रियेते इति। श्रवणादिषु च मुमुक्षूणामधिकारः काम्यकर्मणि फलकामस्याधिकारित्वात्। मुमुक्षायां च नित्यानित्यवस्तुविवेक
स्य इहामुत्रार्थफलभोगविरागस्य शमदमतितिक्षोपरमसमाधानश्रद्धानां च विनियोगः। आंतरिंद्रियनिग्रहः शमः। बहिरिंद्रियनिग्र
व हो दमः। शीतोष्णादिद्वंद्वसहनं तितिक्षा। विक्षेपाभावः उपरतिः। चित्तैकाग्र्यं समाधानं। गुरुवेदवाक्यविश्वासः श्रद्धा। अथोपरमशब्दान
संन्यासोऽभिधीयते। तथा च संन्यासिनामेव श्रवणाधिकार इति केचित्। अपरे तु परमहंसस्य संन्यासवाचकत्वाभावाद्विक्षेपाभा
वमात्रस्य गृहस्थेष्वपि संभवात् जनकादेरपि ब्रह्मविचारस्य श्रूयमाणत्वात् सर्वाश्रमसाधारणं श्रवणादिविधानमित्याहुः।

सगुणोपासनमपि चित्तैकाग्र्यद्वारा निर्विशेषब्रह्मसाक्षात्कारे हेतुः। तदुक्तं। निर्विशेषं परं ब्रह्म साक्षात्कर्तुमनीश्वराः। ये मंदास्तेऽनुक
म्प्यंते सविशेषनिरूपणैः। वशीकृते मनस्येषां सगुणब्रह्मशीलनात्। तदेवाविर्भवेत्साक्षादपेतोपाधिकल्पनमिति। २॥ सगुणोपास
कानां चार्चिरादिमार्गेण ब्रह्मलोकं गतानां तत्रैव श्रवणाद्युत्पन्नेन तत्त्वसाक्षात्कारात् ब्रह्मणा सह मोक्षः। कर्मिणां धूमादिमार्गेणापित
लोकं गतानामुपभोगेन कर्मक्षये सति पूर्वेतन सुकृतदुष्कृतानुसारेण ब्रह्मादिस्थावरांतेषु पुनरुत्पत्तिः। तथा च श्रुतिः। रमणीयच
रणा रमणीयां योनिमापद्यंते। कपूयचरणाः कपूयां योनिमापद्यंते। इति। मलिष्ठानुष्ठायिनां तु रौरवादिनरकविशेषु तत्तत्पा
पोचित तीव्रदुःखमनुभूय सूकरादितिर्यग्योनिषु स्थावरादिषु चोत्पत्तिरित्यलमतिप्रसंगेन। निर्गुणब्रह्मसाक्षात्कारवतस्तु न लो
कांतरगमनं। न तस्य प्राणा उत्क्रामंतीति श्रुतेः। किंतु यावत्प्रारब्धक्षयं सुखदुःखे अनुभूय पश्चादपवृज्यते। ननु क्षीयंते चास्य क
र्माणि तस्मिन् दृष्टे परावरे इत्यादिश्रुत्या ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते अर्जुनेति स्मृत्या च ज्ञानस्य सकलकर्मक्षयहेतुत्व
निश्चये सति प्रारब्धकर्मावस्थानमनुपपन्नमिति चेन्न। तस्य तावदेव चिरं यावन्न विमोक्ष्ये अथ संपत्स्य इत्यादिश्रुत्या नाभुक्तं
क्षीयते कर्मेत्यादिस्मृत्या चोत्पादितकार्यकर्मव्यतिरिक्तानां संचितकर्मणामेव ज्ञानविनाश्यत्वावगमात्। संचितं द्विविधं सु

कृतं दुष्कृतं चेति। तथा च श्रुतिः। तस्य पुत्रा दायमुपयन्ति सुहृदः साधुकृत्यां द्विषन्तः पापकृत्यामिति। ननु ब्रह्मज्ञानान्मूलाज्ञाननिवृत्तौ
तत्कार्यस्यारब्धकर्मणोऽपि निवृत्तेः कथं ज्ञानिनो देहधारणमुपपद्यते इति चेन्न। अप्रतिबद्धज्ञानस्यैवाज्ञाननिवर्तकतया प्रार
ब्धकर्मरूपप्रतिबंधकदशायामज्ञाननिवृत्तेरनंगीकारात्। नन्वेवमपि तत्त्वज्ञानादेकस्य मुक्तौ सर्वमुक्तिः स्यात् अविद्याया एकत्वे
न तन्निवृत्तौ कस्यचिदपि संसारायोगादिति चेन्न। रव्यापत्तेरित्येके। अपरे त्वेतद्दोषपरिहाराय चेन्द्रो मायाभिरिति बहुवचनश्रुत्यनु
गृहीतमविद्यानानात्वमित्याहुः। अन्ये तु एकैवाविद्या तस्या एवाविद्याया जीवभेदेन ब्रह्मस्वरूपावरणशक्तयो नाना। तथा च य
स्य ब्रह्मज्ञानं तस्य ब्रह्मस्वरूपावरणशक्तिविशिष्टाविद्यानाशः न तु अन्यं प्रति ब्रह्मस्वरूपावरणशक्तिविशिष्टाविद्यानाश इत्यव
गमान्नैकमुक्तौ सर्वमुक्तिः। अत एव यावदधिकारमवस्थितिराधिकारिणामित्यस्मिन्नधिकरणेऽधिकारिपुरुषाणामुत्पन्नत
त्त्वज्ञानानां देहधारणानुपपत्तिमाशंक्याधिकारापादकप्रारब्धकर्मसमाप्त्यनंतरं विदेहकैवल्यमिति सिद्धांतितं। तदुक्तमाचार्यैः
वाचस्पतिमिश्रैः। उपासनादिसंसिद्धितोषितेश्वरचोदितं। अधिकारं समाप्यैते प्रविशंति परं पदमिति। एतेनैकमुक्तौ सर्वमुक्ते
रितिपक्षोऽप्युपपद्यते। तस्मादेकाविद्यापक्षेऽपि प्रतिजीवमावरणभेदोपगमेन व्यवस्थोपपादनीया। तदेवं ब्रह्मज्ञानान्मोक्षश्चो

63

६०५०७२॥

नर्थनिवृत्तिर्निरतिशयानंदावाप्तिश्चेति सिद्धं प्रयोजनं॥ इति श्रीधर्मराजदीक्षितविरचितायां वेदांतपरिभाषायां अष्टमः परिच्छेदः समाप्तश्चायं ग्रंथः॥ शुभं भवतु॥ श्रीगुरुचरणप्रसादेन समाप्तमिदं लेखनं॥ तत्सत्परमेश्वरार्पणमस्तु॥छ॥

[OrderDescription]
,CREATED=23.09.20 10:12
,TRANSFERRED=2020/09/23 at 10:21:01
,PAGES=64
,TYPE=STD
,NAME=S0003651
,Book Name=M-1606-VEDANT PARIBHASHA
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF

FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF

FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,FILE56=00000056.TIF
,FILE57=00000057.TIF
,FILE58=00000058.TIF
,FILE59=00000059.TIF
,FILE60=00000060.TIF
,FILE61=00000061.TIF
,FILE62=00000062.TIF
,FILE63=00000063.TIF
,FILE64=00000064.TIF
,